Let thy marrow come together with marrow, and thy joint together with joint; together let what of thy flesh has fallen apart, together let thy bone grow over.—3.

सा. भा. । हे प्रहृत, ते—तव शरीरस्थो मज्जा—एतत्संज्ञः षष्ठो धातुः प्रहारेण विभक्तः मज्ज्ञा—मज्जाख्यधातुना प्रहारविभक्तेन सम् भवतु—संयुक्तो भवतु । तथा ते—त्वदीय-शरीरस्य परुषा—भग्नेन पर्वणा परुः—भग्नं पर्व संधीयताम् । ते—तव शरीरगतस्य मांसस्य प्रहाराभिघातेन यद् विस्रसं तत् संरोहतु—प्ररूढं पुनरुत्पन्नं भवतु । तथा तव शरीरगतं यत् अस्थि भग्नम् आसीत् तच्च प्ररूढं संहितं भवतु ॥३॥

4

मज्जा | मज्ज्ञा | सम् | धीयताम् | चर्मणा | चर्म | रोहतु ।

असृक् | ते | अस्थि | रोहतु | मांसम् | मांसेन | रोहतु ॥४॥

Let marrow be put together with marrow ; let skin (*carman*) grow (*ruh*) with skin ; let thy blood, bone grow; let flesh grow with flesh.—4.

सा. भा. । मज्जाख्यो धातुः मज्ज्ञा—मज्जधातुना संधीयताम्—संहितः संयुक्तो भवतु । चर्मणा शस्त्रादिप्रहारभिन्नेन चर्म रोहतु—प्ररूढं भवतु संयुज्यताम् इत्यर्थः । असृक्—रक्तं ते त्वच्छरीरगतं यद् अस्थनः सकाशात् विश्लिष्टं पुनस्तद् अस्थि रोहतु—प्राप्नोतु । मन्त्रौषधि-सामर्थ्येन संयुज्यताम् इत्यर्थः । यद्वा, असृजा असृग् रोहतु, अस्थ्ना अस्थि रोहतु इति । शिष्टं निगदसिद्धम् ॥४॥

5

लोम | लोम्ना | सम् | कल्पय | त्वचा | सम् | कल्पय | त्वचम् ।

असृक् | ते | अस्थि | रोहतु | छिन्नम् | सम् | धेहि | ओषधे ॥५॥

Fit thou together hair with hair; fit together skin (*tvac*) with skin ; let thy blood, bone grow ; put together what is severed, O herb.—5.

सा. भा. । हे लाक्षात्मिके ओषधे, शरीरस्थं लोम लोम्ना प्रहारविश्लिष्टेन संकल्पय—संकृ तं पुनः स्वस्थानगतं कुरु । तथा त्वचमपि विश्लिष्टत्वचा संकल्पय—संक्लृप्तां कुरु । असृक् ते अस्थि रोहतु इति पूर्ववत् । एवम् अन्यदपि छिन्नम् भग्नं यद् यद् अङ्गम् अस्ति, तत् सर्वं संधेहि—संहितं संश्लिष्टं व्यापारक्षमं कुरु इत्यर्थः ॥५॥

6

सः | उत् | तिष्ठ | प्र | द्रुहि | प्र | द्रव | रथः ।

सुऽचक्रः | सुऽपविः | सुऽनाभिः | प्रति | तिष्ठ | ऊर्ध्वः ॥६॥

Do thou here stand up, go forth, run forth, a chariot well-wheeled, well-tired, well-naved, stand firm upright.—6.

सा. भा. । हे शस्त्रप्रहारादिभिर्विश्लिष्टावयव पुरुष, सः—तादृशः मन्त्रौषधिप्रभावेण संहितगात्रः सन् उत् तिष्ठ—शयनाद् उद्गच्छ । प्रेहि—तस्मात् स्थानात् प्रगच्छ । प्र द्रव—प्रधाव वेगेन गच्छ । उक्तम् अर्थम् दृष्टान्तेन द्रढयति रथ इत्यादिना । सुचक्रः—सुदृढैश्चक्रैर्युक्तः सुपविः—सुदृढः पविर्नेमिश्चक्रधारा यस्य स तथोक्तः, सुनाभिः—सुदृढया नाभ्या—अक्षच्छिद्रेण युक्तः एवंगुणविशिष्टो रथः यथा प्रगमनादिव्यापारं कुर्वन् प्रतिष्ठितो भवति एवं त्वमपि सुदृढाङ्गो भूत्वा ऊर्ध्वः—उत्थितः सन् प्रति तिष्ठ—प्रतिष्ठितो भव ॥६॥

7

यदि | कर्तम् | पतित्वा | सम्ऽशश्रे | यदि | वा | अश्मा | प्रऽहृतः | जघान ।
ऋभुः | रथस्यऽइव | अङ्गानि | सम् | दधत् | परुषा | परुः ॥७॥

If falling into a pit, he hath been crushed (*sam-śṛ*), or if a stone hurled (*pra-hṛ*) hath smitten [him]—as a Ṛbhu the parts of a chariot, may it put together joint with joint.—7.

सा. भा. । यदि कर्तम्—कर्तकं छेदकम् आयुधम् पुरुषशरीरे पतित्वा संशश्रे—संश्रृणाति संहिनस्ति । श्रृ हिंसायाम् इत्यस्मात् छान्दसो लिट् । यदि वा—अपि वा अश्मा—पाषाणः प्रहृतः—परेण पुरुषशरीरे प्रक्षिप्तः सन् जघान—हन्ति पुरुषं हिनस्ति । तेन आयुधेन अश्मना च हिंसितं परुः—पर्व परुषा—पर्वान्तरेण संदधत्—मन्त्रौषधप्रभावः संदधातु । तत्र दृष्टान्तः । ऋभू रथस्येवेति । सुधन्वनः आङ्गिरसस्य त्रयः पुत्रा बभूवुः 'ऋभुर्विभ्वा वाज' इति (नि॰ ११. १६) यास्कवचनात् सुधन्वनः पुत्राः ऋभ्वादयः रथनिर्माणादिना देवत्वं प्राप्ताः । तथात्वं च 'तक्षन् रथं सुवृतं विद्मनापसः' (ऋ॰ १. १११. १)* इत्याद्याभंवसूक्तेषु प्रसिद्धम् । ऋभुर्यथा रथस्य अङ्गानि अक्षचक्रेषायुगादीनि निर्माय संदधाति एवम् आथर्वणो मन्त्रो विश्लिष्टम् अङ्गं संदधाति इत्यर्थः ॥७॥

ऋभुः—The comm. takes Ṛbhu as one of the three Ṛbhus quoting RV. i. 111. 1; 'skilled leech'—Griff; 'clever, expert, a skilful workman, meaning here a surgeon.' 'Or the meaning may be: Let him (the God) join limb with limb as joins a smith the portions of a car.'—Griff.

---

* See The Ṛgveda : Hymn No. 13 and notes p. 19

Hymn No. 3

[*Extolling a certain rice-mess offering.*]

IV. 34.

1

ब्रह्म | अस्य | शीर्षम् | बृहत् | अस्य | पृष्ठम् ।
वामऽदेव्यम् | उदरम् | ओदनस्य ॥
छन्दांसि | पक्षौ | मुखम् | अस्य | सत्यम् ।
विष्टारी | जातः | तपसः | अधि | यज्ञः ॥१॥

The *brahman* (is) its head, the *bṛhat* its back, the *Vāmadevya* the belly of the rice-mess ; the metres (are) the two sides (wings ?) ; truth its mouth, the *viṣṭārin* (is) a sacrifice born out of fervour (*tapas*).—1.

सा. भा. । अस्य—ओदनस्य दीयमानस्य शिरःप्रभृत्यवयवकल्पनया स्तुतिः क्रियते । ब्राह्मणजात्या सह प्रजापतिमुखादुत्पन्नत्वाद् ब्रह्म-शब्देनात्र रथन्तरं साम विवक्षितम् । अतएव तस्य ब्रह्मवर्चसरूपता समाम्नाता—'रथन्तरं साम भवति ब्रह्मवर्चसं वै रथन्तरम्' इति । तद् ब्रह्मशब्दवाच्यं रथन्तरं साम अस्य—ओदनस्य शीर्षम्—शिरः । तथा बृहत्—बृहत् साम अस्यौदनस्य पृष्ठम्—पृष्ठभागः उपरिभागः । तथा वामदेव्यम्—वामदेवेन दृष्टं साम उदरम् । 'वामदेवाड्ड्यड्ड्यौ' इति ड्य-प्रत्ययः । छन्दांसि—गायत्र्यादीनि पक्षौ । तथा सत्यम्—सत्याख्यं साम परं ब्रह्म वा अस्य—ओदनस्य मुखम् । एवं विष्टारी—विस्तीर्यमानावयवः । विपूर्वात् स्तृणातेः कर्मणि णिनि-प्रत्ययः । अथवा 'प्रथने वावशब्दे' इति घञ् । ततो मत्वर्थीय इनिः । तादृशोऽयं सवयज्ञः तपसः—तप्यमानाद् ब्रह्मणः अधि—उपरि जातः—उत्पन्नः । यज्ञ-दानादिलक्षणात् अन्यस्मात् तपसो वा आधिक्येनोत्पन्न इत्यर्थः ॥१॥

'The hymn is a glorification of a certain sacrifice called *Viṣṭārin*, whose chief element is *Odana*, a mess or broth of mashed rice or other grain cooked with milk.'—Griff.

* * *

3

विष्टारिणम् | ओदनम् | ये | पचन्ति ।
न | एनान् | अवतिः | सचते | कदा | चन ॥
आस्ते | यमे | उप | याति | देवान् ।
सम् | गन्धर्वैः | मदते | सोम्येभिः ॥३॥

Want never comes upon those who cook the viṣṭārin oblation (rice-mess—Whitney). Such a man abides with Yama, goes to the gods and lives in blessedness with the Gandharvas, the quaffers of Soma.—3

सा. भा । विष्टारिणम्—उदीरितरीत्या विस्तीर्यमाणावयवम् ओदनं ये—यजमानाः पचन्ति, पक्त्वा ब्राह्मणेभ्यो प्रयच्छन्तीत्यर्थः । एनान्—यजमानान् अवतिः वृत्तिर्जीवनं तदभावः अवतिः—दारिद्र्यं कदाचन—कदाचिदपि न सचते—न समवैति । षच समवाये । बहुवद् उक्तम् एकवदाह । यः (पचति) स च सवयज्ञानुष्ठाता देहविश्लेषानन्तरं यमे—पितृणाम् अधिपतौ पूजितः सन् आस्ते सुखेन वसति । तेन अनुज्ञातः सन् देवान् उप याति—उपगच्छति । तथा सोम्येभिः—सौम्यैः सोमार्हैः गन्धर्वैः—विश्वावसुप्रभृतिभिः सोमपालैः सह मदते—अमृतमयसोमपानेन माद्यति ॥३॥

सोम्येभिः—see note on सोम्यासः, v. 1, RV. Hymn No. 25, p. 282.

4

विष्टारिणम् | ओदनम् | ये | पचन्ति ।
न | एनान् | यमः | परि | मुष्णाति | रेतः ॥
रथी | ह | भूत्वा | रथऽयानं | ईयते ।
पत्ती | ह | भूत्वा | अति | दिवः | सम् | एति ॥४॥

Yama does not steal away the generative power of those who cook the viṣṭārin oblation. (Such a man) becomes lord of a chariot on which he is borne along; becoming winged, he soars beyond the sky.—4.

सा भा. । नैनानित्यन्तं पूर्ववत् । यमः—नियन्ता जीवनापहारी एनान्—सवयज्ञानुष्ठातॄन् रेतः परि न मुष्णाति—नापहरति । रेतोहीनान् न करोतीत्यर्थः । स च—सवयज्ञानुष्ठाता रथयाने—रथेन यातव्ये भूलोके यावज्जीवम् रथी ह भूत्वा—रथाधिरूढ एव ईयते—सञ्चरति । ईङ् गतौ दिवादिः । अन्तरिक्षमार्गे च पक्षी—पक्षवान् भूत्वा दिवः—अन्तरिक्षवर्तिनीन् उपरितनान् लोकान् अतिक्रम्य समेति—तत्तद्भोगस्थानेषु भोगैः सङ्गच्छते ॥४॥

* * *

6

घृतऽह्रदाः | मधुऽकूलाः | सुराऽउदकाः | क्षीरेण | पूर्णाः | उदकेन | दध्ना ॥

एताः | त्वा | धाराः | उप | यन्तु | सर्वाः | स्वःऽगे | लोके | मधुऽमत् ।

पिन्वमानाः | उप | त्वा | तिष्ठन्तु | पुष्करिणीः | समुऽअन्ताः ॥६॥

Having pools of ghee, having slopes of honey, having strong drink (*surā*) for water, filled with milk (*kṣīra*), with water, with curds—let all these streams (*dhārā*) come unto thee, swelling honeyedly in the heavenly (*svarga*) world ; let complete (*samanta*) lotus-ponds approach thee.—6.

सा भा. । दधिमधुघृतादिलक्षणस्य दिश्यासु कुल्यासु पर्यमाणस्य रसस्य एताः सर्वा धाराः—प्रवाहाः फलभूते स्वर्गे लोके मधुमत्—मधुयुक्तं माधुर्यवद् वा पिन्वमानाः—सिञ्चन्त्यः त्वा—त्वाम् उप यन्तु—उपगच्छन्तु । तथा समन्ताः—पर्यन्तवर्तिन्यः पुष्करिणीः—पुष्करिण्यः सरस्यः । हे सवयज्ञानुष्ठातः, त्वा—त्वाम् उप तिष्ठन्तु—उपस्थिताः सङ्गता भवन्तु । कीदृश्यस्ताः । घृतह्रदाः—घृतपूर्णह्रदयुक्ताः । मधुकूलाः—मधुना माक्षिकेण युक्तानि कूलानि यासां ताः । सुरोदकाः—सुरा मद्यमेव उदकं यासां ताः । तथा क्षीरेण उदकेन दध्ना च पूर्णाः । एतेषु घृतादिद्रव्येषु यद्यत् कामयसे तेन तेन पूर्णा बहुविधाः पुष्करिण्यः त्वां सेवन्ताम् इत्यर्थः । दध्नेति 'अस्थिदधिसक्थ्यक्ष्णाम् अनङ् उदात्तः' इति अनङादेश उदात्तश्च । अल्लोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ॥६॥

Note: As regards svarga or heaven and the joys of the departed, see a fuller and more attractive account in the Rgveda, ix. 113. 7-11.

7

चतुरः । कुम्भान् । चतुःऽधाः । ददामि । क्षीरेण । पूर्णान् । उदकेन । दध्ना ॥
एताः । त्वा । धाराः । उप । यन्तु । सर्वाः । स्वःऽगे । लोके । मधुऽमत् ।
पिन्वमानाः । उप । त्वा । तिष्ठन्तु । पुष्करिणीः । समुऽद्यन्ताः ॥७॥

Four vessels (*kumbha*), four fold, I give, filled with milk, with water, with curds—let all these etc., etc.—7.

सा. भा. । क्षीरादिद्रव्येण पूर्णान् चतुरः कुम्भान् चतुर्धा—प्राग्दादिदिग्भेदेन चतुष्प्रकारं दधामि—दिक्षु निदधामि । एताः क्षीरादिधाराः त्वाम् उप यन्तु इत्यादि योज्यम् ॥७॥

8

इमम् । ओदनम् । नि । दधे । ब्राह्मणेषु ।
विष्टारिणम् । लोकजितम् । स्वःऽगम् ॥
सः । मे । मा । क्षेष्ट । स्वधया । पिन्वमानः ।
विश्वऽरूपा । धेनुः । कामऽदुघा । मे । अस्तु ॥८॥

This rice-mess I deposit in the Brāhmaṇas, the *Viṣṭārin*, world-conquering, heaven-going (*svar-ga*); let it not be destroyed (*kṣi*) for me, swelling with *Svadhā*; be it a cow of all forms, milking my desire.—8.

सा. भा. । इमम् प्रकृतम् ओदनं ब्राह्मणेषु—अग्रजन्मसु भोक्तृषु नि दधे—निक्षिपामि । कीदृशम्? विष्टारिणम्—प्रागुक्तविस्तारोपेतम् । लोकजितम् । लोक्यत इति लोकः कर्मफलं तज्जयसाधनम् अत एव स्वर्ग्यम्—स्वर्गशब्दाभिधेयदुःखासम्भिन्ननिरतिशयसुखस्य साधनम् । स ओदनः तस्मिन् स्वर्गे लोके स्वधया—क्षीरादिरसेन पिन्वमानः—वर्धमानः मा क्षेष्ट—क्षयं मा प्राप्नोतु । क्षि क्षये । माङि लुङ् । पिन्वमान इति । पिवि सिवि गिवि सेचने । इदित्त्वान्नुम् । अपि च ओदनः विश्वरूपा—नानाविधफलप्रदरूपा धेनुः सती मे—मम

कामदुघा—अभिलषितफलस्य दोग्ध्री अस्तु—भवतु। कामान् दुग्धे इति कामदुघा। 'दुहः कब्घश्च' इति कब्घत्वे ॥८॥

धेनुः कामदुघा—'The mythical cow of Plenty, fulfiller of all desires.'
Vide Muir OST., Vol. V, p. 307.

Hymn No. 4

VII. 5.

Mystic: on the offering or sacrifice.

1

यज्ञेन | यज्ञम् | अयजन्त | देवाः।
तानि | धर्माणि | प्रथमानि | आसन् ॥
ते | ह | नाकम् | महिमानः | सचन्त।
यत्र | पूर्वे | साध्याः | सन्ति | देवाः ॥१॥

By the sacrifice the gods sacrificed to the sacrifice, those were the first ordinances (*dharman*); those greatnesses attach themselves to (*sac*) the firmament, where are the ancient (*pārva*) perfectible (*Sādhya*) gods.—1.

सा. भा। देवाः—कर्मणा देवत्वं प्राप्ता यजमानाः पूर्वं यज्ञेन—अग्निना निर्मथ्येन यज्ञम्—होमाधारम् आहवनीयम् अग्निम् अयजन्त। यजिरत्र सङ्गतिकरणवाची। अनुष्ठानाय संयोजितवन्त इत्यर्थः। 'यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियते' इति हि तैत्तिरीयकम् (तै॰ स॰ ६. २. १ ७)। तानि धर्माणि—अग्निसाधनानि कर्माणि प्रथमानि। प्रथम इति मुख्यनाम। प्रतमानि प्रकृष्टतमानि आसन् फलप्रसवसमर्थानि अभवन्नित्यर्थः।

* Verses 3 and 4—The translation is from Muir OST. The curious student may read Vol. V, p. 307, where Muir has dwelt upon the subject of Paradise

धर्मोणीति धर्मशब्दः अपूर्वे पुंलिङ्गः तत्साधने नपुंसक इति 'अर्धर्चाः पुंसि च' इति सूत्रे वृत्तिकारेण लिङ्गानुशासनं कृतम्। ते ह—ते खलु देवा महिमानः—महत्त्वयुक्ता नाकम्—कं सुखम् अकं दुःखं तदत्र नास्तीति नाकः—स्वर्गः तं सचन्त—सङ्गताः। षच समवाये। लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। यत्र—यस्मिन् नाके पूर्वे—पुरातनाः साध्याः। प्राणाभिमानिनो देवाः साध्या इत्युच्यन्ते। तथा च वाजसनेयकम् 'प्राणा वै साध्या देवास्त एतम् अग्रम् एवम् असाधयन्' इति (श॰ ब्रा॰ १०. १. २. ४)। देवाः सन्ति—निवसन्ति। तस्मादिदानीमपि यज्ञाधिकारिभिः एवं कर्तव्यमित्यर्थः। अत्र ऐतरेयकब्राह्मणम्—'यज्ञेन वै तदेवा यज्ञम् अयजन्त। यदग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्' इति (ऐ॰ ब्रा॰ १. १६)। यत्र पूर्वे साध्याः सन्ति देवा इति। 'छन्दांसि वै साध्या देवाः। तेऽग्रेऽग्निनाग्निमयजन्त। ते स्वर्गं लोकप्रायन्नादित्याश्चैवेहासन्नङ्गिरसश्च। तेऽग्रेऽग्निनाग्निमयजन्त। ते स्वर्गं लोकमायन्' इति (ऐ॰ ब्रा॰ १. १६) ॥१॥

The hymn is a glorification of sacrifice. The (first) verse is taken with a change in the meaning, from RV. i. 164. 50 and RV. x. 90. 16 (see p. 298); found also in VS. xxxi. 16, TS. iii. 5. 115, TA. iii. 12. 7, MS. iv. 10. 3, ŚB. x. 2. 2, with comment.

ते ह नाकम्...साध्याः सन्ति देवाः—"This passage and vii. 79. 2 cast light upon the idea of *Sādhya*; there are two kinds of gods: those with Indra at their head and the *Sādhyas*—'they who are to be won'—(*Sādhya* 'what is to be brought into order, under control or into comprehension'). They are thus the unknown, conceived as preceding the known. Later they are worked into the ordinary classification of Vasus, Rudras, etc.; and what was formerly a serious religious problem, a hierarchy conceived as possible before the now-accepted gods (something like the pre-Olympians with the Greeks), has become an empty name."—Roth.

साध्याः—"meaning probably, 'those who are to be propitiated'; acc. to Yāska 'the Gods whose dwelling place is the sky. 'In the Amarakoṣa they are named among the minor deities, but they seem rather to be the most ancient of the Gods."—Griff.

2

यज्ञः | बभूव | सः | आ | बभूव।
सः | प्र | जज्ञे | सः | ऊं इति | वावृधे | पुनः।
सः | देवानाम् | अधिऽपतिः | बभूव।
सः | अस्मासु | द्रविणम् | आ | दधातु ॥२॥

The sacrifice came to be ; it came to be here ; it was propagated ; it increased again ; it became overlord of the gods ; let it assign wealth to us.—2.

सा. भा. । यज्ञः—यज्ञरूपः प्रजापतिः प्रसिद्धो वा यज्ञः स बभूव विश्वात्मना व्याप्तः निर्वृत्तो वा अभूत् । स आ बभूव—सर्वतः कारणात्मना अभवत् । यद्वा, स निर्वृत्तो यज्ञः आवृत्य भवतु पुनः पुनर्भवतु । छान्दसो लिट् । स प्र जज्ञे । जानातेर्जायतेर्वा रूपम् । प्रज्ञातः प्रसिद्धो यज्ञः प्रकर्षेण जातः फलोन्मुखो जात इत्यर्थः । उ-शब्दः अवधारणे । स एव पुनर्बाबृधे—अद्यापि जगदात्मना पुनः पुनर्वर्धते वर्धतां वा यज्ञः । तुजादित्वाद् अभ्यासस्य दीर्घः । स देवानाम्—इन्द्रादीनामधिपतिः—अधिको मुख्यः स्वामी बभूव । यज्ञो वा हेतुत्वाद्देवानाम् अधिकं पालयिताभूत् । स च यज्ञः अस्मासु हविषा परिचरत्सु द्रविणम्—धनम् अभिमतं फलम् आ दधातु—स्थापयतु ॥२॥

3

यत् | देवाः | देवान् | हविषा | अयजन्त | अमर्त्यान् | मनसा | अमर्त्येन ।

मदेम | तत्र | परमे | विऽओमन् | पश्येम | तत् | उत्ऽइतौ | सूर्यस्य ॥३॥

As the gods sacrificed to the gods with oblation, to immortals, with immortal mind—may we revel there in the highest firmament ; may we see that at the rising of the sun.—3.

सा. भा. । देवाः—कर्मणा देवत्वं प्राप्ताः यत् फलम्, उद्दिश्येति क्रियाध्याहारः । अमर्त्यान्—अमरणधर्मणो देवान् इन्द्रादीन् अमर्त्येन—अमर्त्यसम्बन्धिना देवविषयेणेत्यर्थः । अविनाशिना वा । भोगायतनेष्वागमापायिष्वपि मनसोऽवस्थानान्नित्यत्वम् । तादृशेन चिरकालावस्थायिना मनसा हविषा—चरुपुरोडाशादिना अयजन्त—इष्टवन्तः इति स्वेषामेव परोक्षेणाभिधानम् । 'विद्वान् यजेत' इति 'विद्वान् याजयेत' इति वचनाद् अनुष्ठेयार्थप्रकाशकमन्त्रार्थयष्टव्यदेवताकर्तृज्ञानरूपं वैदुष्यं कर्मसु अपेक्षितम् तच्च पूर्वापरानुसन्धानसाधनभूतेन मनसा विना न सम्भवतीति मनसेत्युक्तम् । 'यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद् वषट्करिष्यन्' इति हि (ऐ° ब्रा° ३.८) श्रुतिः । वषट्कारवचनम् उपलक्षणम् । तत्र—तस्मिन् परमे—उत्कृष्टे केवलपुण्यफलभोगस्थाने व्योमन्—व्योमनि द्युलोके मदेम—वयं यजमाना हृष्याः स्म । माधतेः 'लिङ्याशिष्यङ्'-प्रत्ययः । अपि च सूर्यस्योदितौ । द्युलोके हि नित्योदितः सूर्यः । सूर्यप्रकाशे यावत्सूर्यप्रकाशं तत् फलं पश्येम । पश्यतिरत्र आलोचनवाची । भोग्यत्वेन जानीमः । चिरकालं पुण्यफलम् अनुभवेमेत्यर्थः ॥३॥

4

यत् | पुरुषेण | हविषा | यज्ञम् | देवाः | अतन्वत ।

अस्ति | नु | तस्मात् | ओजीयः | यत् | विऽहव्येन | ईजिरे ॥४॥

• When, with man (*puruṣa*) for oblation, the gods extended the sacrifice—even than that is it of more force that they sacrificed with the *Vihavya*.—4.

पा. भा. । सर्वातिशायिसर्वात्मकहिरण्यगर्भरूपफलप्रापकात् पुरुषमेधाख्यमहाक्रतोरपि सर्वात्मकब्रह्मस्वरूपावाप्तिफलप्रापको ज्ञानयज्ञः श्रेयान् इत्यनया अभिधीयते । पुरुषमेधविधायकं वाक्यम् एवं वाजसनेयब्राह्मणे समाम्नायते । 'पुरुषो ह वै नारायणोऽकामयत । अतितिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्याम् इति । स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुम् अपश्यत् । तम् आहरत् । तेनायजत । तेनेष्ट्वात्यतिष्ठत् । सर्वाणि भूतानीदं सर्वम् अभवत्' इति (श° ब्रा° १३.५.५.१) । देवाः—दीव्यन्तीति देवा यजमानाः । पुरुषेण अश्वरूपेण हविषा । 'अथ स पुरुषोऽश्व आसीत्' इति वाजसनेयश्रुतेः । अत्र साक्षात् पुरुषस्य अनालम्भनात् पर्यग्निकरणानन्तरम् उत्सर्गविधानाद् अश्वमेधातिदिष्टोऽश्वः पशुः पुरुषशब्देन विवक्ष्यते । तेन हविषा यज्ञम्—पुरुषमेधाख्यम् अतन्वत—विस्तारितवन्तः । यद्वृत्तयोगादनिघातः । 'ब्रह्मणे ब्राह्मणम् आलभते' (तै° ब्रा° ३. ४ १. १) इत्यादिना समाम्नाता ब्राह्मणक्षत्रियवैश्यशूद्रादिरूपा बहवः पुरुषपशवो विद्यन्ते इति यज्ञविस्तारोक्तिः । एवं पुरुषहविष्कयज्ञ इति यदस्ति तस्माद् ओजीयः—अतिशयेन ओजस्वि सारवत् अस्ति—नु विद्यते खलु । सामान्यनिर्देशेन यज्ञस्वरूपापेक्षया वा नपुंसकत्वम् । ओजीय इति ओजस्विशब्दाद् ईयसुनि विनो लुकि रूपम् । ओजीयोऽस्तीति प्रतिज्ञातम् तद् दर्शयति । विहव्येन । हव्यं होतव्यहविः विगतहविष्केण ज्ञानयज्ञेन ईजिरे—इष्टवन्तः स्वात्मानं परमात्माभेदेन साक्षात्कृतवन्त इति यत् तद् ओजीय इति । द्रव्ययज्ञज्ञानयज्ञयोरुभयोः सार्वात्म्यलक्षणफलसाम्येऽपि पुरुषमेधफलसाम्येऽपि पुरुषमेधफलस्य कर्मजन्यत्वेन विनाशित्वं ज्ञानयज्ञफलं तु न तथेति तस्माद् ओजीय इत्युक्तम् । भगवतापि उक्तम्—'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप' इति (भ° गी° ४ ३३) ॥४॥

The first half of this verse is identical with that of RV. x. 90. 6. see pp. 51 and 292.

"यत् पुरुषेण हविषा.....अतन्वत"—"*With their oblation, Puruṣa, the Gods performed a sacrifice*" : See RV. x. 90, the Puruṣa-sūkta or hymn which describes the sacrifice of Puruṣa.....; a pantheistic hymn which appears to be an attempt to harmonize the two ideas of sacrifice and creation." —Griff.

विहव्येन—Griff. translates *Vihavya* as 'invoking hymn.' The comm. explains *Vihavya* as meaning an offering without oblation, an offering of knowledge (jñāna-yajña) ; and this is perhaps acceptable; or the half verse is perhaps to be understood as a question.

5

मुग्धाः | देवाः | उत | शुना | अयजन्त |

उत | गोः । अङ्गैः | पुरुऽधा | अयजन्त ॥

यः | इमम् | यज्ञम् | मनसा | चिकेत |

प्रऽ| नः | वोचः । तम् | इह | इह | ब्रवः ॥५॥

The gods, confounded, both sacrificed with a dog and sacrificed variously with limbs of a cow; he who knoweth with the mind this sacrifice—him (the spiritual guide) mayest thou proclaim to us here, here mayest thou speak.—5.

सा. भा. । एवं कर्मयज्ञात् ज्ञानयज्ञस्य उत्कर्षं श्रुत्वा कर्मयज्ञं निन्दन् अविनाशिफलकामस्तटस्थो ब्रूते । मुग्धाः—कार्याकार्यविवेकरहिता देवाः—यजमानाः । उत-शब्दः अप्यर्थे । शुनापि अयजन्त । यज्ञो हि पशुसाधनकः । तत्र अत्यन्तगर्हितस्यापि शुनः पशुत्वेन निर्देशात् कर्मयज्ञस्य निन्दा दर्शिता । अख्यानां परमावधिः श्वा । तथा । उत-शब्दः अप्यर्थे । गोः—गोरूपपशोः अङ्गैः—अवयवैरपि । 'हृदयस्याग्रे वदयति' (तै° स° ६.३.१०.४) इति अङ्गावदानश्रवणाद् अङ्गैरित्युक्तम् । अवध्यानां परमावधिर्गौः । पुरुधा—बहुधा अयजन्त । एकदा करणे प्रमादाज्ञानादिकृतम् इति सम्भावना भवति । अतस्तन्निरासाय पुरुधेत्युक्तम् । सर्वदा शुनकगवादिरूपैः पशुभिर्यज्ञं कुर्वन्तीत्यर्थः । एवं पूर्वार्धेन कर्मयज्ञं निन्दित्वा उत्तरार्धेन ज्ञानयज्ञप्राप्तये तदभिज्ञं प्रार्थयते । यो विद्वान् इमं यज्ञं यष्टव्यं परमात्मानं मनसा चिकेत—जानाति स्म तं तथाविधं गुरुं नः—अस्माकं प्रवोचः—प्रकर्षेण ब्रूहि । तेन प्रदर्शितं गुरुं ब्रूते । इहेह—इहैव इदानीमेव ब्रवः—परमात्मस्वरूपं ब्रूहि ॥५॥

मुग्धाः—'perplexed': "it seems impossible that *mugdhāḥ* can be the right reading here. A substantive in the instrumental case is required by the context."—Griff. M. Victor Henry reads—'*mūrdhnā*', with the head.

शुना यजन्त—'*Sacrificed with a dog*': No legend referring to this extra-ordinary sacrifice has survived.

BCU 2669.

Hymn No. 5.

XIX, 53.

Kāla-sūkta (A hymn to Kāla or Time deified).

1

कालः | अश्वः | वहति | सप्तऽरश्मिः ।
सहस्रऽअक्षः | अजरः | भूरिरेताः ॥
तम् | आ | रोहन्ति | कवयः | विपःऽचितः ।
तस्य | चक्रा | भुवनानि | विश्वा ॥१॥

Time ((*kāla*) drives (*vah*) [as] a horse with seven reins, thousand-eyed, unaging, possessing much seed ; him the inspired poets mount ; his wheels are all beings (*bhuvana*).—1.

सा. भा. । 'कालो अश्वो वहति' इति सूक्तद्वयस्य सौवर्णभूमिदाने आज्यहोमे विनियोगः । उक्तं हि परिशिष्टे—'अन्वारभ्याथ जुहुयात् कामसूक्तं कालसूक्तं पुरुषसूक्तम्' इति (प° १०. १) कालप्रतिपादकत्वात् कालसूक्तम् इत्युच्यते ।

अनेन सूक्तद्वयेन सर्वजगत्कारणभूतः कालरूप परमात्मा स्तूयते । तत्र प्रथमया कालोऽश्वात्मना रूप्यते । सप्तरश्मिः—सप्तसंख्यका रश्मयो रज्जवो मुखग्रीवापादावबद्धा यस्य सः, सहस्राक्षः—सहस्रलोचनः, अजरः—जरारहितः नित्ययुवा, भूरिरेताः—प्रभूतवीर्यः, कालः—कलयिता अश्वः वहति—स्वारोहकान् अभिमतं प्रदेशं प्रापयति । तम् अश्वं विपश्चितः—अश्वारोहणावरोहणादिषु कुशलाः अश्वशास्त्रनिष्णाताः कवयः—धीमन्तः आरोहन्ति । तस्य—अश्वस्य चक्रा—चक्राणि गन्तव्यानि स्थानानि विश्वा—विश्वानि भुवनानि इति अश्वपक्षेऽर्थः ॥ विवक्षितस्तु—अश्वः—अश्नुते व्याप्नोति भूतभविष्यद्वर्तमानकालवर्तीनि वस्तूनीति अश्वः । कालः—कलयिता सर्वस्य जगतः अनवच्छिन्नकालरूपः परमेश्वरः । सप्तरश्मिः । रश्मिशब्देन ऋतव उच्यन्ते । सप्तर्तुः । एकैकै ऋतुर्मासद्वयात्मकः सप्तमस्तु त्रयोदशो मासः । सहस्राक्षः । अत्र अक्षिशब्देन दिनानि रात्रयश्च उच्यन्ते । सहस्रसंख्याकाहोरात्रयुक्तः । अजरः—जरारहितः सर्वदा एकरूपः । भूरिरेताः—प्रभूतजगत्सर्जनसमर्थशक्तिसम्पन्नः । एवंरूपः कालः वहति—प्राणिजातं स्वस्वकर्मसु प्रापयति । तं—कालं कवयः—क्रान्तदर्शिनः विपश्चितः—विद्वांसः आरोहन्ति—स्वाधीनं कुर्वन्ति । स्वाधीनकाला भवन्ति इत्यर्थः । तस्य—कालात्मकस्य रथस्य चक्रा—चक्राणि विश्वा—विश्वानि भुवनानि—भूतजातानि लोकान् अभिगच्छन्तीति शेषः ॥१॥

सप्तरश्मिः—'seven reins': "The seven solar rays. The word *raśmi* means both 'rein' and 'ray of light'. *Cf.* 'Seven to the one-wheeled chariot yoke the courser; bearing seven names the single courser draws it,' (RV. i. 164. 2); where, however, *the courser* is the Sun, and the *seven* are said by Sāyaṇa to be the priests."—Griff.

2

सप्त | चक्रान् | वहति | कालः | एषः |

सप्त अस्य | नाभीः | अमृतम् | नु | अक्षः ॥

सः | इमा | विश्वा | भुवनानि | अञ्जत् |

कालः | सः | ईयते | प्रथमः | नु | देवः ॥२॥

Seven wheels doth this time drive; seven [are] his naves, immortality (*amṛta*) forsooth [his] axle; he, time, including (?) all these beings,* goes on as first god.—2.

सा. भा. । अनया संवत्सररूपकालचक्रं वर्ण्यते । तस्य संवत्सरकालस्य चक्राणि एकं त्रीणि पञ्च षट् सप्त द्वादशेति तत्र तत् आम्नायते । 'सप्त युञ्जन्ति रथम् एकचक्रम्' (९. १४. २) 'त्रिनाभि चक्रम्' (९. १४. २) 'सप्तचक्रे षडरे' (९ १४ १२) द्वादशारम् (९. १४. १३) इत्यादिषु । तथा च शौनकोऽप्याह—

'त्रिधा द्वादशधा षोढा पञ्चधा सप्तधा तथा ।
संवत्सरं चक्रवच्च पराभिः कीर्तयत्यृषिः ॥' इति (बृ ४. ३३) ॥

एष सर्वजगत्कारणत्वेन अनुभूयमानः कालः—परमात्मा सप्त चक्रान्—चक्राणि सप्त ऋतून् अनुक्रमेण वहति—धारयति । अस्य संवत्सरस्य सप्त नाभीः—नाभयः । नह्यते नाभिः । अक्षबन्धकानि मध्यच्छिद्राणि सप्त ऋतुसन्धिकालाः । अस्य अक्षः अमृतम्—अमरणधर्मकम् अविनश्वरं तत्त्वम् । सः—पूर्वोक्तसंवत्सररूपः प्रथमः—सर्वस्य आदिभूतो देवः—द्योतमानः नित्यज्ञानरूपः कालः—परमात्मा इमा—इमानि नामरूपात्मना व्याकृतानि विश्वा—विश्वानि भुवनानि—भवनवन्ति चराचरात्मकानि जगन्ति अञ्जत्—अञ्जन् व्यक्तीकुर्वन् स्वेन कालेन अविच्छिन्नानि कुर्वन् उत्पादयन् सः—स्यति संहरतीति सः । यो अन्तकर्मणि कर्तरि क-प्रत्ययः, आतो लोपः । संहरंश्च ईयते—गच्छति व्याप्नोति सर्वम् आवृत्य वर्तते । नु-शब्दः प्रसिद्धौ ॥२॥

* Roth and Whitney read भुवनान्यर्षाट् for भुवनान्यञ्जत् । Griff. translates भुवनान्यञ्जत् as "*brings hitherward all worlds.*"

सप्त चक्रान्—'*seven rolling wheels*: perhaps the six pairs of month anp the thirteenth or intercalary month; or the seven divisions of the year, solstice, season, month, fortnight, day, night, hour.'

सप्त···नाभीः—'*seven naves*': perhaps the seven generic Vedic metres.

'Acc. to Dr. Ehni (Der Mythus des Yama, pp. 116, 117), the seven naves are the seven worlds which constitute the universe; the seven wheels are the seven seasons which are produced by the annual course of the Sun, which is brought about by time; and the axle represents the World of Immortality which remains firm and unmoved through all changes of time and season.'—Griff.

3

पूर्णः | कुम्भः | अधि | काले | आऽहितः ।
तम् | वै | पश्यामः | बहुऽधा | नु | सन्तः ॥
सः | इमा | विश्वा | भुवनानि | प्रत्यङ् ।
कालम् | तम् | आहुः | परमे | विऽओमन् ॥३॥

A full vessel is set upon time; we indeed see it, being now manifoldly: it [is] in front of all these beings; it call they time in the highest firmament (*vyoman*).—3.

सा. भा. । काले—सर्वजगत्कारणभूते नित्ये अनवच्छिन्ने परमात्मनि स्वस्वरूपे। अधिशब्दः सप्तम्यर्थानुवादी। पूर्णः—सर्वत्र व्याप्तः कुम्भः—कुम्भवत् कुम्भः अहोरात्रमासर्तु-संवत्सरादिरूपः अवच्छिन्नो जन्यः कालः आहितः—निहितो वर्तते। सर्वस्य कार्यस्य स्वकारणे-ऽवस्थानात्। अत्र विद्वदनुभवश्रुतिं प्रमाणयति। तम्—जन्यं कालं सन्तः—सत्पुरुषा बहुधा—नानाप्रकारम् अहोरात्रादिभेदेन पश्यामो नु—अनुभवामः खलु। अथवा तं—जन्यकालाधारं परमात्मानं बहुधा—बहुभिः श्रवणमननिदिध्यासनैः पश्यामः—साक्षात् कुर्मः। सन्तः—सद्रूप-ब्रह्मोपासका वयम्। 'अस्ति ब्रह्मेति चेद् वेद सन्तम् एनं ततो विदुः" इति हि श्रुतिः (तै° आ° ८ ६) वै-नु-शब्दौ प्रसिद्धार्थौ। स कालः इमा—इमानि परिदृश्यमानानि विश्वा—विश्वानि व्याप्तानि भुवनानि—भूतजातानि प्रत्यङ्—प्रत्यञ्चनः अभिमुखाञ्चनः आव्याप्नुवन् भवति। तं कालं परमे—उत्कृष्टसांसारिकसुखदुःखादिद्वन्द्वदोषरहिते व्योमन्—व्योमनि आकाशवन्निर्लेपे सर्वगते विविधं रक्षके परमानन्दप्रदायके स्वस्वरूपे वर्तमानम् आहुः विद्वांसः ॥३॥

कुम्भः—'beaker': 'The Sun, imagined as a golden urn over-flowing with light.'—Griff. *Cf.* Lanman in this connection: "The highly obscure 'full vessel' (पूर्णः कुम्भः) is thus illuminated (?) by the comm.; पूर्णः सर्वैश्च व्याप्तः कुम्भः कुम्भवत् कुम्भोऽहोरात्रमासर्तुसंवत्सरादिरूपोऽवच्छिन्नो जन्यः कालः।"

4

सः | एव | सम् | भुवनानि | आ | अभरत्।

सः | एव | सम् | भुवनानि | परि | ऐत् ॥

पिता | सन् | अभवत् | पुत्रः | एषाम्।

तस्मात् | वै | न | अन्यत् | परम् | अस्ति | तेजः ॥४॥

He indeed together brought beings; he indeed together went about (*pari-i*) beings; being father, he became son of them; than him verily there is no other brilliancy that is higher ((*para*).—4.

सा. भा. । स एव कालः भुवनानि—भूतजातानि सम् आ अभरत्—आहरत् आहरति उत्पादयति। 'हृग्रहोर्भः'। स एव कालः भुवनानि सं पर्यैत्—सम्यक् परिगच्छति व्याप्नोति। इण् गतौ छान्दसे लङि 'आडजादीनाम्' इति आडागमः। 'आटश्च' इति वृद्धिः। स एव पिता—एषां भुवनानां जनकः सन् एषां पुत्रोऽभवत् भवति। काल एव पितृत्वेन पुत्रत्वेन व्यवहियते। यः पूर्वजन्मनि पितृत्वेन जातः स एव अस्मिन् जन्मनि पुत्रत्वेन व्यवहियते। अवच्छेदककालाधीनत्वात् सर्वस्य। अथवा एकस्मिन् जन्मन्येव पितुः पुत्रत्वम् आम्नायते। 'अङ्गाद् अङ्गात् सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्' इति (कौ° उ° २.१९)। तस्मात्—सर्वोत्पादकात् सर्वगतात् पुत्रादिरूपेण भविष्यतश्च तस्मात्—कालाद् अन्यत् परम्—उत्कृष्टं तेजो नास्ति। 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः (क° व° ५.१५)।

5

कालः | अमूम् | दिवम् | अजनयत् | कालः | इमाः | पृथिवीः | उत।

काले | ह | भूतम् | भव्यम् | च | इषितम् | ह | वि | तिष्ठते ॥५॥

Time generated yonder sky, time also these earths; what is and what is to be—stands out, sent forth by time.—5.

सा. भा. । कालः—परमात्मा अमूम् —विप्रकृष्टां दिवम्—द्युलोकम् अजनयत्—उत्पादितवान्। उत—अपि च इमाः —परिदृश्यमानाः सर्वप्राण्याधारभूताः पृथिवीः। व्यत्ययेन बहुवचनं कक्ष्याभेदेन वा। तथा च मन्त्रवर्णः —'यद् इन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्याम् उत स्थः इति (ऋ 1.108.9)। तथा ह-शब्दः एवार्थे। काल एव भूतम्—भूतकाले आधारे अवच्छिन्नं भव्यम्—भविष्यच्च इषितम्—इष्टम् इष्यमाणम्। वर्तमानकालावच्छिन्नं च जगत् वि तिष्ठते—विशेषेण आश्रितं वर्तते।

6

काल: | भूतिम् | असृजत | काले | तपति | सूर्य: ।

काले | ह | विश्वा | भूतानि | काले | चक्षु: | वि | पश्यति ॥६॥

Time created the earth; in time burns (*tap*) the sun; in time [are] all existences; in time the eye looks abroad.—6.

सा. भा. । कालः—कालरूपः परमात्मा भूतिम्—भवनवज्जगद् असृजत। काले प्रेरके सति सूर्यः—आदित्यः तपति—जगत् प्रकाशयति। काल एव आश्रये विश्वा—विश्वानि भूतानि वर्तन्ते। काले चक्षुः। उपलक्षणम् एतत्। चक्षुरादीन्द्रियाणि। वि पश्यति। इदमपि उपलक्षणम्। दर्शनादिकर्माणि कुर्वन्ति।

7

काले | मन: | काले | प्राण: | काले | नाम | सम्ऽआहितम् ।

कालेन | सर्वा: | नन्दन्ति | आऽगतेन | प्रऽजा: | इमा: ॥७॥

In time is mind, in time is breath, in time is name collected (*sam-ā-dhā*); by time, when arrived, all these creatures (*prajā*) are glad (*nand*).—7.

सा. भा. । काले—परमात्मनि मनः—जगत्सिसृक्षानिमित्तभूतं मनो वर्तते। तस्मिन्नेव प्राणः—सूत्रात्मा सर्वजगदन्तर्यामी वर्तते। अन्तर्यमनोपाधिकत्वेन काले वर्तते इति आधारव्यपदेशः। तथा नाम—नामधेयम् सर्वेषां वस्तूनां संज्ञा अपि तत्रैव समाहितम्। स्त्रीपुरुषादिसंज्ञाभिः काल एव उच्यते इत्यर्थः। कालेन—वसन्तादिरूपेण आगतेन सर्वा इमाः प्रजाः नन्दन्ति—सन्तुष्यन्ति स्वस्वकार्यसिद्धेः।

8

काले | तपः | काले | ज्येष्ठम् | काले | ब्रह्म | समाहितम् ।
कालः | ह | सर्वस्य | ईश्वरः | यः | पिता | आसीत् | प्रजापतेः ॥८॥

In time is fervour, in time is what is chief, in time is the *brahman* collected; time is the lord (*īśvara*) of all, who was father of Prajāpati.—8.

सा. भा. । काले—परमात्मनि तपः—जगत्सर्जनविषयं पर्यालोचनम् । तप पर्यालोचने अस्माद् असुन् । तथा ज्येष्ठम्—सर्वस्य आदिभूतम् हिरण्यगर्भाख्यं तत्त्वं वर्तते । तथा ब्रह्म—साङ्गो वेदस्तत्प्रतिपादकः समाहितम्—सम्यगाहितः । ह-शब्दः अवधारणे । कालः सर्वस्य जगत ईश्वरः—स्वामी । यः कालः प्रजापतेः—प्रजानां स्रष्टुश्चतुर्मुखस्य ब्रह्मणः पिता—जनक आसीत् ।

तपः—'Holy Fire'—Griff.: 'religious fervour, devotion or austerity; rigorous abstraction.'—Muir. See note on **'तपसो महिना'**, v. 3, No. 30 (R.V.), p. 331.

ज्येष्ठम्—'The Highest'—Griff.

ब्रह्म—'divine knowledge'—Muir.

9

तेन | इषितम् | तेन | जातम् | तत् | ऊं इति | तस्मिन् | प्रतिऽस्थितम् ।
कालः | ह | ब्रह्म | भूत्वा | बिभर्ति | परमेऽस्थिनम् ॥९॥

Sent by it, born by it, in it is this ((*tat*) set firm; time becoming the *brahman*, bears the most exalted one.—9.

सा. भा. । तेन—कालेन इषितम्—इष्टं सर्वं स्रष्टव्यं जगत् । कामितम् इत्यर्थः । 'तीषुसह' इति इडागमः । तेनैव जातम्—उत्पादितं जगत् । तत्—तज्जगत् । ऊ-शब्दः अवधारणे । तस्मिन्नेव काले प्रतिष्ठितम् । कालो ह—काल एव ब्रह्म देशकालावच्छिन्नं सच्चित्सुखयितृरसम् अबाध्यं परमार्थतत्त्वं भूत्वा परमेष्ठिनम् परमे स्थाने सत्यलोके तिष्ठन्तं चतुर्मुखब्रह्माणं बिभर्ति ॥

ब्रह्म—In this verse Muir translates *Brahma* by 'divine energy.'

10

काल: | प्रऽजा: | असृजत | काल: | अग्रे | प्रजाऽपतिम् ।

स्वयम्ऽभू: | कश्यप: | कालात् | तप: | कालात् | अजायत ॥१०॥

Time generated progeny, time in the beginning Prajāpati ; the self-existent Kaśyapa from time, fervour from time was born.—10.

सा. भा. । कालः अग्रे—सृष्ट्यादौ प्रजापतिम्—ब्रह्माणम् असृजत उदपादयत्, प्रजाश्च असृजत । स्वयम्भूः—स्वयम् आत्मना भवतीति स्वयम्भूः । कालव्यतिरिक्तकालान्तर-निषेधकः स्वयंशब्दः । कश्यपः—आरोगभ्राजादिसप्तसूर्यापेक्षया अष्टमः सूर्यः । 'कश्यपोऽष्टमः स महामेरुं न जहाति' इति श्रुत्यन्तरम् (तै॰ आ॰ १.७.१) उदाहृतम् । कश्यपशब्दनिर्वचनं यास्केन एवं कृतम्—'कश्यपः पश्यको भवति यत् सर्वं परिपश्यतीति सौक्ष्म्यात्' इति (तै॰ आ॰ १.८.८) । तादृशः सर्वस्य द्रष्टा सूर्यः तपः—सन्तापकं तेजश्च कालाद् अजायत ।

स्वयम्भूः कश्यपः—'self-made Kaśyapa': Kaśyapa is a divine being identified with Prajāpati; and as Muir observes, *Svayambhūḥ*, self-born or self-made—an epithet which is elsewhere applied to Brahmā, the derived and phenomenal demiurgus or creator—'must be regarded as not meaning anything more than one who comes into existence in an extra-ordinary and super-natural manner.' *Cf.* Muir OST., Vol. V, p. 407. Monier Williams, Indian Wisdom, p. 25. Griffith—(AV.) p. 311. Scherman (with annotations and commentary).

THE BRĀHMAṆA.

No. 1.

Aitareya Brāhmaṇa

The story of Śunaḥśepa.*

I

Hariścandra, the son of Vedhas, of the family of the Ikṣvākus, was a king without a son. He had a hundred wives, but had no son by them. He asked Nārada: 'Tell me, Nārada, what do people gain by a son, whom they all wish for, as well those who reason as those who do not?'

Nārada replied—' If a father sees the face of a son, born alive, he discharges his debt in him and attains immortality.—1.

' The pleasure which a father has in his son is greater than all the pleasures that are from the earth, from the fire and from the waters.—2.

* The legend of Śunaḥśepa has been translated into Latin by Dr. Streiter in his 'Diss. de Śunaḥsepo,' into German by Prof. Roth in Weber's Ind. Studien, i. 457 ff., into English by Prof. Wilson, Journ. Royal Asiatic Society,' Vol. XIII, for 1851, pp. 96 ff., by Dr. Haug in his Ait. Brāhmaṇa, Vol. II, pp. 460 ff., by Prof. MaxMüller in his Ancient Sanskrit Literature, pp. 408 ff. (pp. 210 ff., Pāṇini Office Ed.), from which the above translation has been taken. A nice summary of the story is to be found in Muir, OST., Vol. I, p. 355. For the interesting remarks of Prof. MaxMüller and Roth on this legend, see Muir, OST., Vol. I, pp. 558-60.

The story of Śunaḥśepa was most popular in ancient India, and is to be found in the *Śāṅkhyāyana-sūtras*, with some variations in rdgs., the text of which has been printed in the appendix, Prof. MaxMüller's Anci. Skt. Lit. (Pāṇ. Office Ed.)

This legend is alluded to in the Kāṭhaka Brāhmaṇa, ixx. 11, quoted by Prof. Weber, Ind. St. iii. 478: 'शुनःशेपो वै एताम् (ऋचम्) आजिगर्तिर्वरुणगृहीतोऽप्रशयत् तया स वै वरुण-पाशाद् अमुच्यत,'—Śunaḥśepa, the son of Ajigarta, when seized by Varuṇa, saw this (verse) and by it he was released from the bonds of Varuṇa. Manu also mentions the story, x. 105. 'अजिगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः। न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्',—Ajigarta, when famished, approached to slay his son; and (by so doing) was not contaminated by sin, as he was seeking the means of escape from hunger. See Kullūka's commentary thereon. The Bhāgavata Purāṇa also records the story in ix. sec. 7 and sec. 16, verses 30-37 and follows the version of Ait. Br. But the Rāmāyaṇa relates some of the circumstances quite differently, where the sacrifice of Śunaḥśepa takes place under King Ambariṣa.

'Always have the father overcome the great darkness by a son; for a Self is born from his self; the son is to him a rescuing boat.—3.

''What avails the dirt, and what the goat skin, what the beard and what asceticism. O Brāhmaṇas, desire a son for yourselves, he is the blameless world.—4.

'Food is life for men, clothing his protection, gold his beauty, cattle his strength,[1] wife is a friend, daughter is a pity; but the son is his light in the highest world.—5.

'As husband enters his wife, becomes the embryo in her womb. Having been renewed in her, he is born in the tenth month.—6.

'A wife is a *Jāyā* (wife), because man is born (*Jāyate*) again in her.

'She is a mother (ābbūti) because she brings forth a germ which is hidden in her.—7.

'The gods and sages brought great light unto her. The gods said to men: "In her you will be born again."—8.

'There is no life for him, who has no son, this the animals also know.—9.

'This is the highly sung, happy path, which the persons possessed of sons do occupy, free from sorrow. This (even) the animals and birds can see'.—10.

भाष्यसारः। हरिश्चन्द्रो[2] नाम राजर्षिः, 'प्रस्कण्वहरिश्चन्द्रावृषी' (पा° ६. १. १५३) इति पाणिनिना सूचितत्वात्। स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा पुत्रहीन आस—आसीत्। स च शतसङ्ख्यानां मध्ये कस्याञ्चिदपि जायायां पुत्रं न लेभे।

ये विजानन्ति—ये देवमनुष्यादयो वि जानन्ति—विवेकज्ञानयुक्ताः, ये च—पश्वादयो न—न विजानन्ति विवेकज्ञानरहिताः, ते सर्वेऽपि नु—क्षिप्रं यम् इमं पुत्रमिच्छन्ति तेन पुत्रेण किं स्विद्विन्दते—किं नाम फलं पिता लभते?—इति राज्ञः प्रश्नः।

[1] 'Marriage means cattle'—Winternitz, see his note thereon:—At the marriages in Anci. India, the purchase price for daughters was paid in cows as in Anc. Greece. *Cf.* 'Oxen-bringing maidens' in Homer.

[2] Hariścandra was, according to the Purāṇas, the son of Triśaṅku, king of Ayodhyā, whom Vasiṣṭha had cursed, and who made Viśvāmitra his Purohita. Viśvāmitra in the Brāhmaṇas is represented as one of Hariścandra's priests, but the office of *Brahman* is held by Vasiṣṭha.

एवं पृष्टो नारदः दशभिः गाथाभिः पुत्रप्रशंसात्मक-प्रत्युत्तरमुक्तवान्—

Cf. पुत्रप्रशंसा, Mahābhārata, Ādiparvan, chap. 100, 67-69 verses, Śāntanu to Bhiṣma:—

'ऋषिर्होतः यथोविद्यासन्तानमपि॰ चाक्षयम् ॥६७॥
सर्वांल्लोकान्यपत्यस्य कर्त्ता नाहुस्ति षोडशीम्।
एवमेतन्मनुष्येषु तत्र सर्वं प्रजास्थिति ॥६८॥
यदपत्यं महाराज तत्र मे नास्ति संशयः।
एषा तथी पुराणानां देवतानाञ्च शाश्वती' ॥६९॥

१। तत्र प्रथमां गाथामाह—ऋणमस्मिन्निति। उत्पन्नस्य सुखेन जीवतः पुत्रस्य मुखं पिता यदि पश्येत् तदा अस्मिन् पुत्रे स्वकीयमृणं लौकिकं वैदिकञ्च सन्नयति—सम्यगवस्थापयति—समर्पयतीत्यर्थः। तथा कृत्वा अमृतत्वं मरणरहितं मुक्तिरूपं विन्दते—पुत्रार्पित-लौकिक-वैदिकभारस्याविघ्नेन तत्त्वज्ञानुसम्पादनात्।

Cf. Manu, iv. 257-258.

'महर्षिपितृदेवानां गत्वानृण्यं यथाविधि।
पुत्रे सर्वं समासज्य वसेन्माध्यस्थमाश्रितः' ॥ etc., see Kullūka's Comm. on the passage:—

'स्वाध्यायेन महर्षीणाम्, पुत्रोत्पादनेन पितृणाम्, यज्ञैर्देवतानां यथाशास्त्रमानृण्यं गत्वा योग्यपुत्रे सर्वं कुटुम्बचिन्ता-भारमारोप्य माध्यस्थमाश्रितः पुत्र-दारा-धनादौ त्यक्तममतो ब्रह्मबुद्ध्या सर्वत्र समदर्शनो गृह एव वसेत्।... ... एवं ब्रह्मसाक्षात्कारेण परं श्रेयो मोक्षलक्षणं प्राप्नोति।

सन्नयति may also mean—क्षपनयति शोधयति *Cf.* Manu, ix. 107. 'यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते.' On this Kullūka comments—'यस्मिन् जाते ऋणं शोधयति येन जातेनामृतत्वं प्राप्नोति।'

Three-fold debts are the three compulsory duties of a Brāhmaṇa: (1) sacrificing to the gods, (2) studying the Vedas and (3) begetting a son; often alluded to in our scriptures.

२। पृथिव्यां भोगाः—निवासादयः, जातवेदसि—अग्नौ भोगाः—दहन-पचनादयः, अप्सु भोगाः—स्नानपानादितृप्तिसाधनानि, प्राणिनामेते सर्वे भोगा यावन्तः सन्ति, तावद्भ्यः सर्वेभ्यो भोगेभ्यो भूयान्—अभ्यधिकः पितुः पुत्रे भोगो विद्यते,—अत्यन्तसुखहेतुत्वात्। तथा च आहुः—'पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयोः'—इति।

३। पितरः—जनकाः। पुत्रेण—उत्पन्नेन पुत्रेण। शश्वत्—सर्वदा। बहुलं तमः अत्यायन्—अभ्यधिकम् ऐहिकमामुष्मिकञ्च दुःखम् अतिक्रामन्ति। आत्मा हि जज्ञ आत्मनः—

* यथोविद्यासन्तानम्—शिष्यप्रशिष्यपरम्परया वेदप्रचारः ।६८। प्रजासु—पशुपक्षिमनुष्येषु ।६८। See *Gāthās* or verses 9 and 10 here.

पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात् स्वयमेव जज्ञे—उत्पन्न इत्युक्तं भवति। स पुत्रः। इरावती। इरा अन्नस्य नाम इरावती—अन्नयुक्ता। अतितारिणी—नदीसमुद्रादेरतितरण-हेतुर्नौरिति शेषः। यथा नौः दुर्वटं नद्यादिकं तारयति, तथा पुत्रोऽप्यैहिकमामुष्मिकञ्च दुःखं तारयतीत्यर्थः।

Cf. Baudhāyana—'पुदिति नरकस्याख्या, दुःखञ्च नरकं विदुः।
पुदस्त्राणात् ततः पुत्रमिच्छन्ति परत्र च॥'

also Manu x. 138—'पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥'

४। मलाजिन-श्मश्रु-तपः-शब्दैः आश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्र-शोणिताभ्यां संयोगात् मलशब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षितम्। क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थं विवक्षितम्। इन्द्रिय-नियम-सद्भावात् तपःशब्देन पारिव्रज्यं विवक्षितम्। एवं मलादि-विवक्षितगार्हस्थ्याद्याश्रमचतुष्टयं किं नु—किं नाम सुखं करिष्यति यथा पुत्रः करोति? अत आश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्त्तव्या। ब्रह्मणः—सम्बोधनपदमेतत्, एतेन क्षत्रियादयोऽप्युपलक्ष्यन्ते, हे विप्रक्षत्रियाद्याः! सर्वे यूयम् पुत्रमिच्छत।

अवदावदो लोकः—वदितुमयोग्यानि निन्दावाक्यान्यवदाः, तैर्वाक्यैर्नोद्यते न कथ्यते—इत्यवदावदः, दोषराहित्यात् निन्दानर्हं इत्यर्थः। तादृशो लोकः भोगहेतुः पुत्रः। लोक्यते। दृश्यते भुज्यते इति लोकः—भोगः। पुत्रा ह्यतवश्च-परमसुखात्मकैहिकभोगस्वरूप इत्यर्थः।

५। अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः। तथा हि शरीरे प्राणावस्थितहेतुत्वादन्नमेव प्राणः। वासः—शीतादुपद्रवाद् रक्षकत्वेन शरणं—गृहसमानम्। हिरण्यम्—कर्णाभरणादिकं दृष्टिप्रियत्वाद् रूपसम्पादकम्। पशवो विवाहाः—गवाश्वादयो विवाह-निर्वाहकाः कन्याशुल्कत्वेन पशूनां व्यवहारात्। जाया सखा—भोगे सहकारित्वात् सखिस्वरूपैव।

Cf. महाभा०, वनप० ३१२ अ०, ६४ श्लो०—'भार्यां मित्रं गृहे सतः' (यक्षप्रश्ने युधिष्ठिरोत्तरम्) पुनश्च—तत्रैव (७२ श्लो०) 'भार्या दैवकृतः सखा।'

कृपणं ह दुहिता—कन्या हि केवलदुःखकारित्वाद् दैन्यहेतुः।

Cf. 'अन्ये स्वजनदुःखकारिका सम्प्रदानसमयेऽपेक्षारिका।
यौवनेऽपि बहुदोषकारिका दारिका खलपदारिका पितुः॥'

ज्योतिर्ह पुत्रः—पुत्रो हि ज्योतिःस्वरूपम्, तमोनिवारकत्वेन प्रकाशरूपत्वेन।

Cf. 'अवन् पुत्रेण पितरोऽयावन् बहुलं तमः' (verse 3 above).

परमे व्योमन्—स हि पुत्रः पितरं परमे व्योमन्—उत्कृष्टे आकाशे, परब्रह्मस्वरूपे अवस्थापयति। व्योमन् इत्यत्र 'सुपां सुलुगि'ति सप्तम्या लुक्।

'आकाशस्तल्लिङ्गात्'—इत्यनेन व्यास-सूत्रेण (१. २. २२) आकाश-व्योमादिशब्दानां ब्रह्म-परत्वं निर्णीतम्।

Cf. Comm. and notes on 'यस्तत्त्व विन्दने' in verse 1 above.

७। अस्यां—गर्भधारिण्याम्। अयम्—पिता पुत्ररूपेण पुनर्जायते। जाया-शब्दो हि जायतेऽस्यामिति व्युत्पत्त्या निष्पन्नो भवति। एषा भूतिः आभूतिश्च। भवत्यस्यां पुत्र-रूपेण पतिरिति—भूतिः। स रेतोरूपेणागत्य अस्यां पुत्ररूपेण भवतीति आभूतिः।

एतत्—एतस्यां जायायाम्, 'सुपां सुलुक्' इति सप्तम्या लुक्।

८। एताम्—एतस्याम् योषितिं, 'व्यत्ययो बहुलमि'ति (पा° ३ १ ८५) विभक्ति-व्यत्ययः। देवा महर्षयश्च स्वकीयं महत् तेजः समभरन्—पुत्रोत्पादनाय सम्पादितवन्तः। ते अब्रुवन्—येयम् इदानीं जायारूपेण वर्त्तते सैव पुनर्युष्माकं पुत्ररूपे जन्मनि जननी भवति।

१०। उरुगायः—उरुभिर्महद्भिः गीयते। *Cf.* v. 1, Hymn No 6 (RV.), p. 152. सुशेवः—सुष्ठु सेवितुं योग्यः सुखाधिक्यस्य विद्यमानत्वात्। *Cf.* v. 4, Hymn No. 17 (RV.), p. 228. पशवः – गवादयः, वयांसि—पक्षिणः।

II

Having thus spoken, he said to him: 'Go to Varuṇa the king[1], and say: "May a son be born to me, and I shall sacrifice him to you."' The king assented, he went to Varuṇa the king and said: 'May a son be born to me and I shall sacrifice him to thee!' Varuṇa said: 'Be it so.' A son was born to him, called Rohita. Then Varuṇa said to Hariścandra: 'A son is born to thee, sacrifice him to me.' Hariścandra said: 'When an animal is more than ten days old, it can be sacrificed, may he be older than ten days and I shall sacrifice him to you.'

Varuṇa assented. The boy was more than ten days old, and Varuṇa said: 'He is older now than ten days, sacrifice him to me.' Hariścandra said: 'When an animal has got teeth then it can be sacrificed. Let him get teeth and I shall sacrifice him to you.'

Varuṇa assented. His teeth came, and Varuṇa said; 'His teeth have come, sacrifice him to me.'

* * * * * * * *

[1] वरुणं राजानम्—See notes on the characteristic features of Varuṇa, para. I, where it is stated that Varuṇa is the king (राजा), nay, the sovereign king (सम्राज्), p. 201.

Hariścandra said, 'When a warrior (Kṣatriya) is girt with his armour, then he can be sacrificed. May he be girt, and I shall sacrifice him to you.'

Varuṇa assented. He was girt, and Varuṇa said: 'He has been girt, let him be sacrificed to me.' Hariścandra assented. He addressed his son and said, 'Child, he gave you to me. I shall sacrifice you to him.' The son said, 'No', took his bow and went to the forest, and lived there for a year.

भाष्यसारः। उवाच—प्रार्थयत्व। प्रार्थनप्रकारमाह—हे वरुण, त्वत्प्रसादात् मे पुत्रो जायताम्, ततस्तेन पुत्रेण त्वा—त्वाम्, यजै—त्वामुद्दिश्य यज्ञं करवाणीति।

वरुणम् उवसपार—प्रार्थयामास। स वरुणोऽपि तथास्तु इति तदीयपुत्रोत्पत्त्यै वरं दत्तवान्।

निर्दशो भवति—निर्गतानि अशीवदितानि दशवंश्याकानि यस्मात् पशोः सोऽयं निर्दशः। नु—क्षिप्रम्। अथ—अनन्तरं त्वां प्रति अहं यजै। वरुणः तथा अस्तु इति अङ्गीचकार।

* * * * *

अजत वै—जाता एव। प्रथमोत्पन्नानां दन्तानामस्थायित्वेन मुख्यपशवयवत्वाभावात्। तथात्वे सति पशोर्मेध्यत्वम्।

* * * * *

सन्नाहं प्राप्नोति—क्षत्रियोचितधनुर्बाणकवचादिसन्नाहशीलत्वे सति तत्युचितव्यापार-सम्पत्तौ मेध्यत्वम्। तस्मात् नु क्षिप्रमेवासौ सन्नाहं प्राप्नोतु, अनन्तरमेव यजै—इति उत्तरं वरुणोऽङ्गीचकार।

सन्नाहप्राप्तेरूर्ध्वं स हरिश्चन्द्रो वरुणोक्तिमङ्गीकृत्य पुत्रमाहूय एवमुवाच। तत—तात। उपलालनार्थं पुत्रे पितृवाचि-तत-शब्दप्रयोगः। हे तत—हे पुत्र, अयम्—वरुणः मह्यं त्वां पुत्रं वरेण दत्तवान्। अहमिमं वरुणं त्वया पुत्रेण यजै—यागरूपां पूजां करवाणीति हरिश्चन्द्रोक्तिः।

स ह न—स खलु रोहिताख्यः पुत्रः, नेति पितुर्वाक्यं निधिध्य आत्मरक्षणार्थं धनुः स्वीकृत्य अरण्यं प्रत्युपगतोऽभूत्। अरण्ये नैरन्तर्येण स रोहितः संवत्सरं चचार।

III

Then Varuṇa seized Hariścandra, and his belly swelled. [1] This Rohita heard and returned from the forest to the village (*grāma*). Indra, in the form of a man, confronted him and said : 'For a man, who does not travel about, there is no happiness, thus we have heard, O Rohita, a good man who stays at home is a bad man. Indra is the friend of him who travels. Travel.'—1.

In the second year (when Rohita meant to turn back), Indra, in the form of a man, again confronted him, and said :

' A traveller's legs are like blossoming branches, he himself grows and gathers the fruit. All his wrongs vanish, destroyed by his exertion on the road. Travel'.—2.

In the third year (when Rohita meant to turn back), Indra again appeared before him, and said : 'The fortune of a man who sits, also sits; it rises, when he rises; it sleeps, when he sleeps ; it moves well, when he moves. Travel'.—3.

In the fourth year (when Rohita meant to turn back), Indra, in the form of a man, re-appeared before him, and said :

'A man, who sleeps, is like the *Kali* age; a man, who awakes, is like the *Dvāpara* age; a man, who rises, is like the *Tretā* age; a man, who travels, is like the *Kṛta* age. Travel.'—4.

In the fifth year (when Rohita meant to return from the forest to the town), Indra, in the form of a man appeared again before him and said :

' A traveller finds honey, a traveller finds sweet figs. Look at the superiority of the sun who travelling never tires. Travel.'—5.

Thus Rohita travelled for six years in the forest. Then he met in the forest a starving Ṛṣi, *Ajigarta*, the son of *Sūyavasa*. He had three sons, *Sunaḥpuccha*, *Sunaḥśepa*, and *Sunolāṅgūla*. Rohita said to him : 'Ṛṣi, I give you a hundred cows, I ransom myself with one of these thy sons'. The father embraced the eldest son, and said : 'Not him.' Nor him,' said the mother, embracing the youngest. And the parents bargained to give Sunaḥśepa, the middle son. Rohita gave a hundred, took him, and went from the forest to the village. Next he came to his father,

[1] He was attacked with dropsy, the disease sent by Varuṇa as a punishment.

and said: 'Father, I ransom myself by this man.' The father went to Varuṇa, said: 'I shall sacrifice this man to you.' Varuṇa said: 'May it be, for a Brāhmaṇa is better than a Kṣatriya.' And he told him to perform a Rājasūya sacrifice. Hariścandra took him to be the victim for the day.

भाष्यसारः। अथ—रोहितस्यारण्ये संवत्सरवासानन्तरम् ऐक्ष्वाकम्—इक्ष्वाकुवंशोत्पन्नं हरिश्चन्द्रम्, वरुणो जग्राह—रोगरूपेण इति शेषः। उदरं जज्ञे—जलेन पूरितमुच्छूतं महोदरनामकं ('उदरी'ति भाषायां प्रसिद्धम् रोगस्वरूपमुत्पन्नम्। तदु ह—तदेव सर्वम् अरण्ये स्थितो रोहितः परम्परया शुश्राव। श्रुत्वा च स रोहितः पितरं द्रष्टुमरण्याद् ग्रामं प्रत्याजगाम। आगच्छन्तं रोहितं मार्गमध्ये इन्द्रः केनचित् ब्राह्मणरूपेण प्राप्य इदमुक्तवान्—

१। नानाश्रान्ताय (न+अनाश्रान्ताय)—सम्यक् श्रान्त आश्रान्तः, सर्वत्र पर्यटनेन श्रान्तिं प्राप्तः, तद्विपरीतोऽनाश्रान्तः—एकत्रैव निवासशीलः नियतगृहासक्तः, तादृशाय—तादृशस्य पुरुषस्येत्यर्थः न श्रीरस्ति इति अन्वयः। न सम्पत् काचन भवतीत्यर्थः। अथवा नाना इति पदच्छेदः। नानेति श्रीविशेषणम्। श्रान्ताय—सर्वत्र पर्यटनेन श्रान्तस्य, नाना श्रीः—बहुविधा सम्पदस्ति।—इति वयं नीतिकुशलानां पुरुषाणां मुखात् शुश्रुम—श्रृणुमः। वरो जनः—विद्यादिभिः श्रेष्ठोऽपि पुरुषः। नृषत्—नृषु मनुष्येषु सीदतीति नृषत् बन्धुगृहेषु सर्वदावस्थितः। तैरवज्ञातः पापः—तुच्छो भवेत्। अतस्तव पितृगृहे प्रत्यावृत्य तत्र स्थिरमवस्थानं न युक्तम्। न च अरण्ये चरतो मम सहायो नास्तीति शङ्कनीयम्। इन्द्र इत्—परमेश्वर इव चरतः—परिभ्रमतस्तव सखा भविष्यति। तस्मात् चर एव सर्वथा अरण्ये इति शेषः।

शश्रुम—perf. (लिट् is here used for pres., Pāṇ., iii. 4.6—'छन्दसि लुङ्लङ्लिटः')

२। पुष्पिण्यौ चरतो जङ्घे—पर्यटन-परस्य पुरुषस्य जङ्घे—पुष्पिता वृक्षशाखा लतेव वा श्रमजयेन सेव्ये भवतः। तथा आत्मा—मध्यदेहः, भूत्वा—वर्धिष्णुः, फलग्रहिः—आरोग्यरूपं फलं गृह्णाति। तथास्य चरतः पुरुषस्य सर्वे पाप्मानः प्रपथे—प्रकृष्टे तीर्थक्षेत्रादिमार्गे श्रमेण—तत्तद्देवतादि-दर्शन-जन्य-पुण्येन, हताः—विनाशिताः सन्तः, शेरे—शेरते। 'लोपस्त आत्मनेपदेषु' (पा० ७.१.४१)। शयाना एव भवन्ति। यथा शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादिकं कर्तुमशक्ताः, एवं पुण्येन विनष्टाः पाप्मानः नरकं दातुमसमर्था इत्यर्थः। तस्मात् सर्वथा अरण्ये चर, न तु श्रमपराङ्मुखो गृहेऽवतिष्ठस्व। सततपरिभ्रमणशीला एव जनाः तीर्थादिदर्शनविनष्टपापाः सन्तः परमपुण्यभाजो जायन्ते इति भावः।

३। भगः—सौभाग्यम्, आसीनस्य—उपविष्टस्य नित्यगृहावस्थानव्यसनिन इत्यर्थः, आस्ते—तथैव तिष्ठति, न तु वर्धते,—अभिवृद्धिहेतोरुद्योगस्याभावात्। तिष्ठतः—उपवेशनं परित्यज्योत्थानं कुर्वतः उद्योगिन इत्यर्थः। पुरुषस्य भगः—सौभाग्यम्, ऊर्ध्वः—अभिवृद्धे-

रुन्मुखस्तिष्ठति, कृषिवाणिज्यादेरुद्योगेन सम्भावितत्वात्। निषद्यमानस्य—भूमौ शयानस्य, भगः शेते—निद्रां करोति, सर्वथैव विनश्यति। चरतः—अर्जनार्थम् पर्यटनं कुर्वतः पुरुषस्य भगः—सौभाग्यं चराति—चरति। व्यत्ययेन लेट्। दिने दिने वर्धते। तस्मात् त्वं चरैवेति, न त्वेकत्र तिष्ठ।

४। चतस्रः पुरुषस्यावस्थाः—निद्रा, तत्परित्यागः, उत्थानम्, सञ्चरणं चेति। ताश्च उत्तरोत्तरश्रेष्ठतया कलि-द्वापर-त्रेता-कृतयुगैः समानाः। ततश्च सञ्चरणस्य सर्वोत्तमत्वाच्चरैवेति।

५। चरन् एव पुरुषः क्वचिद् वृक्षाग्रे मधु—माक्षिकं लभते। क्वचित् स्वादुम्—मधुरम् उदुम्बरादिफलविशेषं लभते। एतदुभयमुपलक्षणम्।—तत्र तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्तरूपेण उदाहियते। यः—सूर्यः सर्वत्र चरन्नपि न तन्द्रयते—कदाचिदप्यलसो न भवति। तस्य सूर्यस्य श्रेमाणं श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। श्रेमाणम्—प्रशस्य + इमनिच्।

Cf. 'यद्वीरासे विदधत् कर्मैवातन्द्रितः शश्वदेति सूर्यः।' महाभा० उद्यो० ५० २८ च:।

अजीगर्तनामानम् ऋषिम्, उपेयाय—प्राप्तवान्। सौयवसिम्—सूयवस-नामकस्य ऋषेः पुत्रम्। अशनया परीतम्—अन्नालाभेन क्षुत्पीडितम्।

निष्क्रीणा इति—निष्क्रीणे + इति, मूल्यस्वरूपेण तवैकतमेन पुत्रेण आत्मानं मोचयामीत्यर्थः।

निगृह्णानः—स्वसमीपे समाकर्षन्। कनिष्ठं शुनोलाङ्गूलं माता हस्तेन गृहीत्वा एवमुवाच,—इमं मम प्रियं कनिष्ठं पुत्रं नो एव—सर्वथा न ददामीति। तौ—मातापितरौ, मध्यमे—पुत्रे शुनःशेपे दानं सम्पादयाञ्चक्रतुः—अङ्गीकृतवन्तौ।

हन्त—हर्षे। यजा इति—यजै + इति,—यज्ञं करवाणीत्यर्थः।

भूयान् वै ब्राह्मणः क्षत्रियात्—यदा हरिश्चन्द्रः स्वकीयपुत्ररोहितस्य प्रतिनिधिरूपेण—शुनःशेपं वरुणमुद्दिश्य यष्टुं निश्चितवान्, तदा वरुणस्तत्प्रबन्धमङ्गीकृत्यैवमुवाच—क्षत्रियात् ब्राह्मणः भूयान्—अभ्यधिकः।

The above text acknowledging a Brāhmaṇa superior to a Kṣatriya, clearly bears evidence to the fact that caste-system and social gradation existed in the Vedic age, or, at least, in the times of the AIT. BR.

तस्मा एतम् प्रोवाच—तस्मै हरिश्चन्द्राय कर्त्तव्यत्वेन राजसूयमुपदिदेश।

अभिषेचनीये—राजसूयं प्रक्रम्य तस्य मध्ये योऽभिषेचनीयाख्यः* एकाहः सोमयागः, तस्मिन् तमेतं शुनःशेपं पुरुषं पशुम् आलेभे—सवनीयपशुत्वेनालब्धुं निश्चितवान्।

* See Āśv. Śraut. Sūtra, 9. 3. 7. 8; also Kātyā. Śraut. Sūtra, 15. 4. 31. 5, 6.

IV

Viśvāmitra was his Hotṛ priest, *Jamadagni* his Adhvaryu priest, *Vasiṣṭha*, the Brahman, *Ayāsya*, the Udgātṛ priest. When Sunaḥśepa had been prepared, they found nobody to bind him to the sacrificial post. And Ajigarta, the son of Sūyavasa, said: 'Give me another hundred, and I will bind him.' He bound him. When he had been prepared and bound, and he had been led round the fire, they found nobody to kill him. And Ajigarta, the son of Sūyavasa, said: 'Give me another hundred, and I shall slay him.' They gave him another hundred, and he came whetting his sword. Then Sunaḥśepa thought, 'they will really kill me as if I was not a man.' I shall pray to the gods; next he prayed, one after another, to Prajāpati, Agni, Viśvedevāḥ, Indra, Aśvins and Uṣas. While each of the three verses, with which he praised Uṣas, was delivered, his fetters gradually got loose, and Hariścandra's dropsical belly grew smaller and when the last verse was said, he was completely released from the fetters, and Hariścandra was fully relieved of the malady.

होता, अध्वर्युः, ब्रह्मा, उद्गाता—the four principal priests of a sacrifice, *vide* note on पुरोहितम्, v. 1, Hymn No. I. (RV).

उपाकृताय—बर्हियुक्तया प्रक्षशाखया मन्त्रपुरःसरं संप्रोक्ष्य स्वीकारः—उपाकरणम्, the act of accepting an animal as a victim after consecrating it with the sprinkling of water, by means of a leafy branch of the banian tree, along with sacred grass (*kuśa*).

नियोक्तारम्—पाशेन यूपे बन्धनं—नियोजनम् तस्य कर्तारम्, the person who binds the animal to be sacrificed to the stake or sacrificial post. (See नियोक्ष्यामि below.)

न विविदुः—न लेभिरे, did not find. नियोक्ष्यामि—रशनया कण्ठां शिरसि पादयोर्बद्धा रशनायास्य यूपे बन्धनं नियोजनम्, तदहं करिष्यामि। निनियोज—उपसर्गस्याभ्यासस्योदात्तः। नियुक्ताय—प्रागुक्तप्रकारेण यूपे बद्धाय। पर्यग्निकृताय—दर्भैरुपेत्योक्तेन विधिना प्रदक्षिणीकरणं पर्यग्निकरणम्, तत् कृतं यस्मिन्।

विशसितारम्—हिंसितारम्, the immolator, killer of an animal offered in a sacrifice; fr. √शस्, to *cut up*, *to dissect*, 1. p. विशसिव (with इट्) is the later Vedic and Class. form. Vedic form is विशस्तृ (Pāṇ. vii. 2. 34, 'यसितप्रभृति···विशस्तृ-शंस्तृशास्तॄ°...'), *cf.* 'एकस्त्वष्टुरश्वस्य विशस्ता,' there is one *immolator* of the radiant horse (Time), RV. i. 162. 19.

निःशानः—निशितं तीक्ष्णं कुर्वन्। एयाय—अगच्छत्। अमानुषमिव वै मा विशसिष्यन्ति—अन्यत 'पर्यग्निकृतं पुरुषमारण्यायोत्सृजन्त्यहिंसायाः' इति श्रुतेः पर्यग्निकरणादूर्ध्वं मनुष्यं परित्यजन्ति। एते माम् अमानुषमिव—मनुष्यव्यतिरिक्तम् अजादिपशुमिव विशसिष्यन्ति—मारयिष्यन्ति। इन्त—हा कष्टम्। उपधावामि—भजामि।

अजीगर्तः—was the father of Sunaḥśepa who undertook to bind his own son to the stake in exchange of one hundred cows, when no other person ventured to do this cruel and inhuman business. Again, when the immolation of the victim son, even as a sacrificial animal, was required, no other person than the father himself stepped forward to execute the ruthless act of brutality for another hundred. This seems irreconcilable to parental conduct. Western scholars have been rather hasty in their condemnation of the father. Prof. MaxMüller has called him a butcher. Manu, however, in his law-code (x. 105), defends the father's action by arguing that in terrible distress and utter poverty—extremely famished as he was—he was compelled to do so—'अजीगर्तः सुतं हन्तुमुद्यमपेद बुभुक्षितः। न चालिप्यत पापेन क्षुत्प्रतीकार-माचरन्'. The real significance and justification, however, seem to be that ancient sages and saintly kings were ready to part with anything they possessed, even their own dearest sons, for divine sacrificial purposes. (*Cf.* the story of the sacrifice of Vṛṣaketu in the Purāṇas.) The hundreds of cows demanded here emphasize only the importance of fees (दक्षिणा) in connection with sacrificial ceremonies which, without the same, bear no fruit.

येन दक्षेन उषसं तुष्टाव—For दक्षेन *vide* Vartt. rule—'ऋचि वेरुत्तरपदादिलोपश्च छन्दसि' (छन्दसि ऋच्-शब्दे परे तेः सम्प्रसारणम् उत्तरपदादेर्लोपश्चेति वक्तव्यम्)। तिस्रः ऋचः यस्मिन्—त्रि+ऋच् +समासान्त अच् (ऋक्पूरब्धूरिति) पुनश्चैतेन वार्त्तिकसूत्रेण सम्प्रसारणम्, उत्तरपदस्य 'ऋचः' आदिवर्णस्य ऋकारस्य च लोपः। दच=group of three *ṛks* or mantras (verses). Here the 3 *ṛks* alluded to, are R.V. i. 30. 20-22. They are:—

(1) 'कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये। 'कं नक्षसे विभावरि' ॥२०॥

O Uṣas, fond of laudation, immortal, what mortal is capable of offering enjoyment worthy of thee? O resplendent one, whom dost thou attain ?

(2) 'वयं हि ते अमन्म ह्यान्तादा पराकात्। अश्वे न चित्रे अरुषि' ॥२१॥

Diffusive, variegated, effulgent Uṣas, we know not (thy form), whether from near or distance.

(3) 'वं' नेमिराघहि वाजेभिर्दुहितर्दिवः। अस्मे रयिं नि धारय' ॥२२॥

O daughter of heaven, come, with these viands and perpetuate wealth in us.

No. 2

ŚATAPATHA BRĀHMAṆA

1. 8. 1.

The story of flood: Manu and the fish.[1]

1st Kāṇḍa] [8th Adhyāya. 1st Brāhmaṇa.

In the morning they brought to Manu water for washing, as men are in the habit of bringing it to wash with the hands. As he was thus washing, a fish came into his hands (which spake to him).—1.

'Preserve me; I shall save thee.' (Manu enquired) 'From what wilt thou save me?' (The fish replied) 'A flood shall sweep away all these creatures; from it I will rescue thee. (Manu asked) 'How (shall) thy preservation (be effected)?'—2.

The fish said: 'So long as we are small, we are in great peril, for (large) fish devours (small) fish; thou shalt preserve me first in a jar. When I grow too large for the jar, then thou shalt dig a trench, and preserve me in that. When I grow too large for the trench, then thou shalt carry me away to the ocean. I shall then be beyond the reach of danger.'—3.

Straightway he became a large fish (झष); for he waxes to the utmost. He said, 'Now in such and such a year, the flood will come'; thou shalt, therefore, construct a ship and resort to me; thou shalt embark in the ship when the flood rises and I shall deliver thee from it.—4.

Having thus preserved the fish, Manu carried him away to the sea. Then in the same year which the fish had enjoined, he constructed a ship and resorted to him. When the flood rose, Manu embarked in the ship. The fish swam towards him. He fastened the cable of the ship to the fish's horn. By this means he passed over this northern mountain.—5.

[1] For other translations of this important legend of the Deluge, See Weber (Ind. Stud. 1. 161 seq.); Max Müller, History of Ancient Sanskrit Literature (Panini office Ed.), p. 219. J. Eggeling, Satapatha Brāhmaṇa (Transl.), S. B.E., Vol. XII.

For the later versions of the same legend, especially the one from the Mahābhārata (Vanaparvan, 12747—12802), see Muir, OST., I. p. 196 seq. Compare in this connection the story of the Deluge and Noah's Ark in the Old Testament.

The fish said, 'I have delivered thee; fasten the ship to a tree. But lest the water should cut thee off whilst thou art on the mountain, as much as the water subsides, so much shalt thou descend after it.' He accordingly descended after as much (as it subsided). Wherefore also this, *viz.*, 'Manu's descent' is (the name) of the Northern mountain. Now the flood had swept away all these creatures. Manu alone was left here.—6.

भाष्यसारः। मनवे—वैवस्वताय। तादर्थ्ये चतुर्थी। अवनेज्यते हस्तादि अनेनेति—अवनेग्यम्। करणे कृत्य-प्रत्ययः। पाणिभ्यां—हस्ताभ्याम्। तस्य—मनोः प्रक्षालयतः। भाविनोऽर्थस्य सिद्ध्यर्थम् देवता एव मत्स्यरूपेण आजगाम ॥१॥

अवनेग्यम् उदकम्—'water for washing'; अवनेज्यते (from √ निज्, *to wash*) हस्तादि अनेन इति करणे कृत्यः (ण्यत्).

मत्स्यः—'To accomplish what was to follow, it was a deity which came in the form of a fish.'—Sāy.

बिभृहि—पुष्णीहि माम्। पारयिष्यामि—रक्षिष्यामि। कस्मात् रक्षिष्यसि—इति भयहेतुः प्रश्नः। ओघः—उदकप्लुतः। सर्वाः—भारतवर्षनिवासिनीः प्रजाः निःशेषं वोढा—देशान्तरं प्रापयिता। कथं तव भृतिः—भरणं पुष्टिः—इति मनोः प्रश्नः ॥२॥

ओघः—निर्वोढा—'The flood will entirely carry away all the creatures abiding in Bhāratavarṣa'; 'we are told that Manu alone was left after the flood.'—Muir. 'A flood will carry away all these creatures.'—Eggeling.

क्षुल्लकाः—क्षुद्रकाः अल्पकाः। नाष्ट्रा विनाशकारणानि। गिलति—निगिरति। गॄ निगरणे इति धातुः।

बिभरासि। अध्येषणायाम् लिङर्थे लेट् (पा° ३ ३.१६१)। बिभ्रियाः एवम्।

अतिवर्धे—अतिरिच्य वर्धितास्मीति प्राप्ते यदायोगे लेट्। कपम्—खातिकाम् (निघ° ३.२३ ६; अमर को° २.१.२७)। अतीतो नाष्ट्रान् नाशयितॄन् इति अतिनाष्ट्रः ॥३॥

शश्वत्—क्षिप्रम्। झषः—महामत्स्यः। आस—बभूव। कस्मात्? सर्व एव हि जलचरा अतिशयेन वर्धन्ते, स तु मत्स्यत्वादनाष्ट्रत्वाच्च ज्येष्ठम्—बृहत्तमं वर्धते इति श्रुतिवचनम्। अथेतिथीम् इति मत्स्यवचनम्। इयतीनां (दशानां द्वादशानां) वा पूरणी—इतिथी। इदम इशादेशश्छान्दसः। समा—संवत्सरः, ताम् समाम् समायाम् इत्यर्थः। उपासासै—उपासीथाः। आपद्यासै—आरोहेः ॥४॥

शश्वद् झष आस, etc.—he became soon (शश्वत्) a large fish (झषः). He said to Manu, 'When I am full-grown, in the same year the flood will come',—Max Müller.

Perhaps 'jhaṣa' is here intended for the name of some fabulous horned fish.—Eggeling.

तन्मा नावमुपकल्पयोपासामै—'Thou shalt then attend to me (*i.e.*, to my advice) by preparing a ship'—Eggeling. 'Build ship then, and worship me'—Max-Müller.

The Mahābhārata has:—'When standing on the ship, thou shalt look out for me: I shall be recognisable by my being furnished with a horn.'

यतिर्थी—यावतीनां पूरगीम्। परिदिदेश—आख्यातवान्। ततिर्थी—तावतीनां पूरगीं समाम्। तम्—मनुम्। उप—समीपे। आपुप्लुवे—आगतः। तस्य मत्स्यस्य शृङ्गे भन्नितव्यतया एव निष्पादिते। नावः पाशं प्रति मुमोच—प्रतिबद्धवान्। उत्तरं गिरिम्—हिमवन्तम्, जगाम ॥५॥

सः—मत्स्य उवाच। पारितवानस्मि त्वाम्। अधुनात्र वृक्षे नावं प्रतिबध्नीष्व; किञ्चापरम्—गिरौ सन्तं त्वा—त्वाम् उदकम् अन्तरैत्सीत् तद्देशमध्यं भित्त्वा पृथगकार्षीत्। यावद्-यावत् अम्भनः उदकं समवायात्—अव अधः अयात् गच्छेत्, अवतरेदित्यर्थः, तावत्-तावत् त्वमपि तदेवोदकम् अनु अवसर्पासि—अवतरेः।

सः मनुः प्राप्ते काले तावत्-तावदेव अन्ववसृप्तः। येन च वर्त्मना मनुः अवसृप्तः, तत् अद्यापि उत्तरस्य गिरेः मनोरवसर्पणम् इति आहुरिति शेषः। अवसृप्तोऽनेन इति अवसर्पणम् ॥६॥

परास्त्वैतत्सीत्—'cut thee asunder'—Max-Müller; 'wash thee away'—Weber. 'Cut thee off'—Eggeling. 'Leave thee stranded'—St. Petersb. Dict.

उत्तरस्य गिरेर्मनोरवसर्पणम्—That (slope) of the northern mountain is called 'Manu's descent.'—Eggeling.

Acc. to the version of the Mahābhārata, 'the peak of the Himālaya to which the ship was tied, was afterwards called *naubandhana*. Prof. Weber also draws attention to AV. xix. 39. 8., where the term *Nāvaprabhraṃśana* is used to mean the summit of the Himavat.

No. 3

TAITTIRĪYA BRĀHMAṆA

Kāṇḍa 1, Prapāṭhaka 5, Anuvāka 9

The gods and the demons were at war; Prajāpati concealed Indra, his eldest son, in order that the mightier demons might not slay him.

Prahlāda was the son of Kayādhu, he hid his own son Virocana with the intent that the gods might not kill him.

The gods approached Prajāpati and said: 'Without the king (the leader of the army) there can be no fight; let us trace out Indra.' (With Prajāpati's permission) They sought Indra by means of (the performance of sacrificial ceremonies called) *Kratus* (Jyotiṣṭoma, Ukthya, etc.).

They could not discover him by means of *Kratus*.

(Next) They sought him with (the celebration of) *Iṣṭis* (the Aṅga sacrifices subordinate to principal *Kratus*).

They discovered him by means of *Iṣṭis*, it is why the Iṣṭis are so designated.

The (real) name, however, is Eṣṭi (instrument for search); but they are called *Iṣṭis* (instruments of sacrifice) by way of disguise. (The use of) Disguise is preferred by the gods.

सा. भा.—देवाश्चासुराश्च यदा युद्धार्थमुद्यतास्तदानीं प्रजापतिः स्वकीयं ज्येष्ठं पुत्रमिन्द्रं युद्धभूमेरपनीय क्वचिद् गूढे स्थाने निहितवान्। तस्याप्ययमभिप्रायः—बलीयांसोऽसुरा एनं दुर्बलमिन्द्रं 'नेदहनन्' (न इत् अहनन्)—नैव घ्नन्तु इति। तथा कयाधुसंज्ञिताया हिरण्यकशिपुभार्यायाः पुत्रः प्रह्लादः स्वकीयं पुत्रं विरोचनमसुरसैन्यस्वामिनं युद्धभूमेरपनीय क्वचिन्निहितवान्। तस्यायमभिप्रायः—एनं विरोचनं देवाः समर्था मा घ्नन्तु इति। एवं च राजद्वयरहितयोः सेनयोरवस्थितयोः सत्योर्देवाः प्रजापतिसमीपं प्राप्यैवमूचुः—राजरहितस्य सैन्यस्य च न क्वचिदपि युद्धमस्ति। युयुत्सवः सर्वेऽपि राजानमन्तरेण पलायिष्यन्ते, तस्मादिन्द्रं राजानं तव तव अन्विच्छाम इत्युक्ते। प्रजापतिनाऽनुज्ञातास्तमिन्द्रं लब्धुं ज्योतिष्टोमोक्थ्यादिरूपान् क्रतून् अनुष्ठितवन्तः। अङ्गभूतेष्टिरहितैस्तैर्महाक्रतुभिरिन्द्रमलब्ध्वा तव कारणमन्वेष्टिवैकल्यं निश्चित्य ता इष्टीरनुष्ठाय ताभिरिष्टिभिरेनं लब्धवन्तः। एवं च सति, अन्वेषणसाधनत्वादेष्टय इत्येतासां नाम।

तथापि मुख्यं नाम गोपयित्वा परोक्षेण तिरोहितेन नाम्ना व्यवहर्तुम् इष्टय इत्याचक्षते। अन्वेषणसाधनत्वमेष्टित्वम्। यजनसाधनत्वमिष्टित्वम्। अतस्तेन व्यवहारे सति मुख्यं नाम परोक्षं भवति। देवानां च परोक्षं नाम प्रियम्। अतएव लोकेऽपि देवदत्तादि-नाम परित्यज्याचार्यो उपाध्याया मिश्रा इत्यादिनामभिः पूज्याः परितुष्यन्ति। यद्यप्यन्वेषणार्थस्वीकारेऽपीच्छतिधातोः क्तिन्-प्रत्यये सति यजि-धातुवदिष्टिरित्येव रूपं सम्पद्यते, तथाप्यौणादिकं कञ्चित् ककार-रहितं प्रत्ययमभिप्रेत्य रूपमीदृशं श्रुत्या विवक्षितम्।

THE UPANIṢAD

No. 1

ĪŚOPANIṢAD

(Verses 1-10)

This Upaniṣad belongs to the Vājasaneya Saṃhitā or the White Yajurveda. 'It forms a part of the *mantra* portion of the Veda itself. It is the fortieth chapter of the White Yajurveda.' (Introduction to the Īśopaniṣad published by the Pāṇini office).

Śaṅkara says that the main teaching of this Upaniṣad is to set forth the identity of the individual soul with the supreme soul and this is attained by the saving knowledge of this identity with the consequent disappearance of all kinds of ignorance, to which the sorrows of mundane existence are due. The claims of Karman are not ignored; on the contrary due performance of the śāstric duties makes one fit for receiving the supreme illumination.

1. Whatever exists in this world, is to be enveloped by (the thought of) God (the ruler). By renouncing it (the world), thou shalt save (thy soul). Do not covet the riches of any one.

2. Performing sacred works, let a man desire to live a hundred years. If thou thus (desirest) O man, there is no other manner, in which thou art not tainted by work.

3. To the godless worlds covered with gloomy darkness—go all the people, when departing (from this world), who are slayers of their souls.

4. He (the soul) does not move, is swifter than the mind; not the gods (the senses) did obtain him, he was gone before, standing he outstrips all the other (gods, senses, how fast they run. Within him the Ruler of the atmosphere (Mātariśvan) upholds the vital actions.

5. He moves, he does not move; he is far, and also near; he is within this all, he is out of this all. (*vide* Bh. G. xiii. 15.)

6. Whoever beholds all beings in the soul alone and the soul in all beings, does, hence, not look down (on any creature).

7. When a man knows that all beings are even the soul, when he beholds the unity (of the soul), then there is no delusion, no grief.

8. He is all-pervading, brilliant, without body, invulnerable, without sinews, pure, untainted by sin; he is all-wise, the ruler of the mind, above all beings and self-existent. He distributed, according to their nature, the things for everlasting years.

9. Those who worship ignorance, enter into gloomy darkness, into still greater darkness those who are devoted to knowledge.

10. They say: different is the effect of knowledge, different is the effect of ignorance; thus we heard from the sages who explained (both) to us.

शाङ्कर-भाष्यम्। ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्ताः तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्व-सर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मांगा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः। न ह्येवं-लक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मा-दात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्ध-पापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकार-विदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशेनात्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति। इत्येव-मुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रान् संक्षेपतो व्याख्यास्यामः।

ईशा वास्यमित्यादि। ईशा ईष्टे इतीट् तेन ईशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया तेन स्वेन रूपेणात्मना ईशा वास्यम् —आच्छादनीयम्। किम्? इदं सर्वं यत् किंच—यत्किञ्चित् जगत्यां—पृथिव्यां जगत्तत् सर्वं स्वेनात्मनेत्येन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचर-माच्छादनीयं स्वेन परमात्मना। यथा चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिष्पर्षणेनाच्छाद्यते। स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्य-ध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपं जगत्यां पृथिव्याम्। जगत्यामितुपल-क्षणार्थत्वात् सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन— त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो वा भृत्यो वात्मसम्बन्धिताया अभावादात्मानं पालयत्यतस्त्यागेनेत्ययमेव वेदार्थः। भुञ्जीथाः—पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः —गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम्। कस्यस्विद्धनं—कस्यचित् परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्? कस्यस्विद्धन-मित्याक्षेपार्थः। न कस्यचिद्धनमस्ति यद् गृध्येत। आत्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः ॥१॥

एवमात्मविदः पुत्राद्येषणालयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः। अथेतरस्यानात्मज्ञतयात्मग्रहणायाशक्तस्येदमुपदिशति मन्त्रः—कुर्वन्नेवेति। कुर्वन्नेवेह—निर्वर्तयन्नेव कर्माणि—अग्निहोत्रादीनि जिजीविषेत्—जीवितुमिच्छेत् शतम्—शतसंख्याकाः समाः—संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरूपितम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवम्—एवंप्रकारेण त्वयि—जिजीविषति नरे—नरमात्राभिमानिनि इतः—एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्। कथं पुनरिदमवगम्यते? पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेत्युच्यते। ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्? इहाप्युक्तं यो हि जिजीविषेत् स कर्म कुर्वन्। 'ईशा वास्यमिदं सर्वं तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमि'ति च। न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदम्। ततो न पुनरियादिति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति। इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः। क्रियापथश्चैव पुरस्तात् संन्यासब्रह्मोत्तरेण निवृत्तिमार्गेणैषणालयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। 'न्यास एवात्यरेचयदि'ति च तैत्तिरीयके। द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिलक्षणो धर्मो निवृत्तश्च विभावित इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागं चानयोर्दर्शयिष्यामः ॥२॥

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते—असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्ते इति जन्मानि। अन्धेन—अदर्शनात्मकेनाज्ञानेन तमसा आवृता—आच्छादितास्तान् स्थावरान्तान् प्रेत्य—त्यक्त्वा इमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम्। ये के चात्महनः। आत्मानं घ्नन्तीत्यात्महनः। के ते जनाः? येऽविद्वांसः। कथं ते आत्मानं नित्यं हिंसन्ति। अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्यात्मनो यत् कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तत् हतस्येव तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते ॥३॥

✓असुर्याः—'असुरस्य स्वम्' (Pāṇ. iv. 4. 123), literally, belonging to *asuras* or demons. Saṅkara assigns a wider meaning to the word. According to him all the worlds and states of existence short of the Absolute Brahman fall within the category of *asura* form of existence. Clearly he takes the sense of etymological meaning. 'असुषु रमते यः सोऽसुरः—(असु + रम् + ड)' 'one who delights in one's life.' Even the state of Brahmā, the creator, and of other gods, is to be included within that category, they being devoid of the supreme knowledge.

यस्यात्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते, ते नात्महनः। तत् कीदृशमात्मतत्त्वमित्युच्यते—अनेजदिति। अनेजत्—न एजत्। एजृ कम्पने। कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्रहितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु। मनसः—संकल्पादिलक्षणाज्जवीयः—जववत्तरम्। कथं विरुद्धमुच्यते ध्रुवं निश्चलमिदं मनसो जवीय इति च। नैष दोषः। निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यते-ऽनेजदेकमिति। मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेरनुवर्तनादिह देहस्थस्य मनसा ब्रह्मलोकादिदूरगमनं संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोकादीन् द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह। नैनद्देवाः—द्योतनाद्देवाश्चक्षुरादीन्द्रियाण्येतत् प्रकृतमात्मतत्त्वं नाप्नुवन्—न प्राप्तवन्तः। तेभ्यो मनो जवीयो मनोव्यापारव्यवहितत्वात्। आभासमात्रमप्यात्मनो नैव देवानां विषयीभवति। यस्माज्जवनान्मनसोऽपि पूर्वमर्षत्—पूर्वमेव गतम्। व्योमवद्व्याप्तित्वात्। सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीव अविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह—तद्धावतः—द्रुतं गच्छतोऽन्यान्—आत्मविलक्षणान् मनोवागिन्द्रिय-प्रभृतीनित्येति—अतीत्य गच्छतीव। इवार्थं स्वयमेव दर्शयति—तिष्ठदिति। स्वयमविक्रियमेव सदित्यर्थः। तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा। अपः—कर्माणि प्राणिनां चेष्टालक्षणानि। अग्न्यादित्यपर्जन्यादीनां ज्वलन-दहन-प्रकाशाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः। धारयतीति वा। 'भीषास्माद्वातः पवते' इत्यादिश्रुतिभ्यः। सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥४॥

न मन्त्राणां जामिताऽस्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह—तदेजतीति। तदात्मतत्त्वं यत् प्रकृतं तदेजति—चलति तदेव च नैजति—स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः। किं च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव। तत् उ अन्तिक इति छेदः। तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरे अन्तिके च। तदन्तरभ्यन्तरेऽस्य सर्वस्य 'य आत्मा सर्वान्तरः' इति श्रुतेः। अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्यास्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वादन्तः 'प्रज्ञानघन एवे'ति च शासनान्निरन्तरं च ॥५॥

यः परिव्राड् मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तान्यात्मन्येवानुपपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः। सर्वभूतेषु च तेष्वेव चात्मानं तेषामपि भूतानां स्वमात्मानमात्मत्वेन यथाऽस्य देहस्य कार्यकारणसंघातस्यात्माऽहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं

निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते—विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणा आत्मनोऽन्यद्दुष्टं पश्यतो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव। ततो न विजुगुप्सत इति ॥६॥

इममेवार्थमन्योऽपि मन्त्र आह—यस्मिन् सर्वाणि भूतानि। यस्मिन् काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृत्तः परमार्थवस्तु विजानतस्तस्य तस्मिन् काले तदात्मनि वा को मोहः कः शोकः? शोकश्च मोहश्च कामकर्मबीजमजानतो भवति तु त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः। को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण असम्भवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥७॥

योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याह अथ मन्त्रः। स पर्यगात् स यथोक्त आत्मा पर्यगात् परि समन्तादगाद् गतवानाकाशवद्व्यापीत्यर्थः। शुक्रं शुद्धं ज्योतिष्मदीप्तिमानित्यर्थः। अकायमशरीरो लिङ्गशरीरवर्जित इत्यर्थः। अव्रणमक्षतम्। अस्नाविरम्—स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्। शुक्रमित्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि। 'स पर्यगादि'त्युपक्रम्य 'कविर्मनीषी'त्यादिना पुंलिङ्गत्वेनोपसंहारात्। कविः—क्रान्तदर्शी सर्वदृक्। 'नान्योऽतोऽस्ति द्रष्टे'त्यादिश्रुतेः। मनीषी—मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां परि उपरि भवतीति परिभूः। स्वयम्भूः—स्वयमेव भवतीति, येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः। स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद् यथातथाभावो याथातथ्यं तस्माद् यथाभूतकर्मफलसाधनतोऽर्थान् कर्तव्यपदार्थान् व्यदधाद्विहितवान् यथानुरूपं व्यभजदित्यर्थः। शाश्वतीभ्यः—नित्याभ्यः समाभ्यः—संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥८॥

अत्राद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः। 'ईशा वास्यमिदं सर्वं मा गृधः कस्य स्विद्धनमि'त्यज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे 'कुर्वन्नेवेह कर्माणि जिजीविषेदि'ति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः—'सोऽकामयत जाया मे स्यादि'त्यादिना। अज्ञस्य कामिनः कर्माणीति 'मन एवास्यात्मा वाग्जाये'त्यादिवचनात्। अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानं जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रतिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक' इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्यः 'असुर्या नाम ते' इत्यादिनाऽविद्वन्निन्दाद्वारेणात्मनो याथात्म्यं 'स पर्यगादि'त्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यनधिकृता न कामिन इति। तथा च श्वेताश्वतराणां मन्त्रोपनिषदि 'अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्पगृषिसंघजुष्टमि'त्यादि विभज्योक्तम्। ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते—'अन्धं तमः' इत्यादि। कथं पुनरिदमवगम्यते न तु सर्वेषामित्युच्यते—

अकामिनः साध्यसाधनभेदोपमर्देन यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति। यदात्मैकत्वविज्ञानं तन्न केनचित् कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते। यदैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्। विद्यया देवलोक इति पृथक्फलश्रवणात् तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात्। विद्यया तदारोहन्ति। विद्यया देवलोकः। न तत्र दक्षिणा यन्ति। कर्मणा पितृलोक इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्। तत्तान्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति। के? येऽविद्यां विद्याया अन्याऽविद्या तां कर्मेत्यर्थः। कर्मणो विद्याविरोधित्वात्। तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति। के? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः। तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह। अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्यादित्यर्थः ॥९॥

अन्यदेवेत्यादि। अन्यत् पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति। 'विद्यया देवलोको विद्यया तदारोहन्ती'ति श्रुतेः। अन्यदाहुरविद्यया कर्मणा क्रियते कर्मणा पितृलोक इति श्रुतेः। इत्येवं शुश्रुम—श्रुतवन्तो वयं धीराणाम् धीमतां वचनम्। य आचार्या नोऽस्मभ्यं तत् कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥१०॥

No. 2

KENOPANIṢAD

This Upaniṣad belongs to the Sāmaveda and is called Talavakāra Upaniṣad.

'The object of the Talava Up. is simply to define the idea of Brahman as the one absolute spirit, and to show its distinction from the world.'

The Talava Up. is commonly called Kena, from the word 'kena,' * with which it commences.

It is one of the Upaniṣads in the Atharva collection, and belongs also to the Sāmaveda, where it forms, according to Śaṅkara the 9th chap. of the Talavakāra School.

* 'केनेषितं पतति प्रेषितं मनः।'

Khaṇḍa 3

1-12

1. Brahman was once victorious for the sake of the gods. By the victory of Brahman, the gods obtained majesty. They reflected: To us belongs this victory, to us belongs this majesty.

2. He knew even that (delusion) of them; he manifested himself to them. They did not know him (and asked each other): Who is this (being) worthy of adoration?

3. They spoke to Agni: Jātavedas, do ascertain who is this being worthy of adoration. (He replied:) Be it so.

4. He (Agni) ran up to him (Brahman)—He (Brahman) said: Who art thou? He answered: I am verily Agni, I am verily Jātavedas.

5. (Brahman asked him:) What power hast thou, who art of such a nature? (Agni replied:) I can even burn whatsoever there is on earth.

6. He placed a piece of grass before him (saying): Burn this. Approaching it with all his might, he could not burn it. He thence returned (saying): I could not ascertain who is this being worthy of adoration.

7. Then they spoke to Vāyu: Vāyu, do ascertain who is this being worthy of adoration. (He replied:) Be it so.

8. He (Vāyu) ran up to him. He (Brahman) said: Who art thou? He answered: I am verily Vāyu, I am verily Mātariśvan.

9. (Brahman asked him:) What power hast thou, who art of such a nature? (Vāyu replied:) I can even sweep away whatsoever there is on earth.

10. He placed a piece of grass before him (saying): Sweep away this. Approaching it with all his might, he could not sweep it away. He thence returned (saying:) I could not ascertain who is this being worthy of adoration.

11. Then they spoke to Indra: Maghavan, do ascertain who is this being worthy of adoration. (He replied:) Be it so. He (Indra) ran up to him. He (Brahman) disappeared in his presence.

12. There in the ether he met with a woman, highly adorned, Umā, the daughter of Himavat. He asked her: Who is this being worthy of adoration?

शाङ्करभाष्यम्। ब्रह्म ह देवेभ्यो विजिग्ये 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इत्यादि-श्रवणाद् यदस्ति तद्विज्ञातं प्रमाणैर्यन्नास्ति तदविज्ञातं शशविषाणकल्पमत्यन्तमेवासद् दृष्टम्। तथेदं ब्रह्माविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति तदर्थेयमाख्यायिकाऽऽरभ्यते। तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देव ईश्वराणामपीश्वरो दुर्विज्ञेयो देवानां जयहेतुरसुराणां पराजयहेतुस्तत्कथं नास्तीत्येतस्यार्थस्यानुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते। अथवा ब्रह्मविद्यायाः स्तुतये। कथं ब्रह्मविज्ञानाद्ब्रह्मन्यादयो देवा देवानां श्रेष्ठत्वं जग्मुस्ततोऽप्यतितरामिन्द्र इति। अथवा दुर्विज्ञेयं ब्रह्मेत्येतत्प्रदर्श्यते। येनाग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेन्द्रो देवानामीश्वरोऽपि सन्निति वक्ष्यमाणोपनिषद्विधिपरं वा सर्वं ब्रह्मविद्याव्यतिरेकेण प्राणिनां कर्तृत्वाद्यभिमानो मिथ्येत्येतद्दर्शनार्थं वाऽऽख्यायिका। यथा देवानां जयाद्यभिमानस्तद्वदिति। ब्रह्म यथोक्तलक्षणं परं ह किल देवेभ्योऽर्थाय विजिग्ये जयं लब्धवद्देवानामसुराणां च सङ्ग्रामेऽसुराञ्जित्वा जगदरातीनीश्वरसेतुभेत्तृन्देवेभ्यो जयं तत्फलं च प्रायच्छज्जगतः स्थेम्ने। तस्य हि किल ब्रह्मणो विजये देवा अग्न्यादयोऽमहीयन्त महिमानं प्राप्नुवन्तस्तदाऽऽत्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितुः प्राणिनां सर्वशक्तेर्जगतः स्थितिं चिकीर्षोरयं जयो महिमा चेत्यजानन्तस्ते देवा एक्षन्तेक्षितवन्तोऽग्न्यादिस्वरूपपरिच्छिन्नात्मकृतोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमाऽग्निवायविन्द्रत्वादिलक्षणो जयफलभूतोऽस्माभिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरकृत इत्येवं मिथ्याभिमानेक्षणवताम् ॥१॥

तद्ध किलैषां मिथ्येक्षणं विजज्ञौ विज्ञातवद्ब्रह्म। सर्वेक्षितृ हि तत्सर्वभूतकरणप्रयोक्तृत्वाद्देवानां च मिथ्याज्ञानमुपलभ्य मैवासुरवद्देवा मिथ्याभिमानात्पराभवेयुरिति तदनुकम्पया देवान्मिथ्याभिमानापनोदनेनानुगृह्णीयामिति तेभ्यो देवेभ्यो ह किलार्थाय प्रादुर्बभूव स्वयोगमाहात्म्यनिर्मितेनात्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रियगोचरे प्रादुर्बभूव। तत्प्रादुर्भूतं ब्रह्म न व्यजानत नैव विज्ञातवन्तो देवाः। किमिदं यक्षं पूज्यं महद्भूतमिति ॥२॥

ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवोऽग्निमग्रगामिनं जातवेदसं सर्वज्ञकल्पमब्रुवन्नुक्तवन्तो हे जातवेदः, एतदस्मद्गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्व त्वं नस्तेजस्वी च, किमेतद्यक्षमिति, तथाऽस्त्विति तद्यक्षमभ्यद्रवत् तत्प्रति गतवानग्निः। तं च गतवन्तं पिपृच्छिषुं तत्समीपेऽप्रगल्भत्वात्तूष्णींभूतं तद्यक्षमभ्यवददग्निं प्रत्यभाषत कोऽसीति। एवं ब्रह्मणा पृष्टोऽग्निरब्रवीदग्निर्वै अग्निनामाऽहं प्रसिद्धो जातवेदा इति च, नामद्वयेन प्रसिद्धत्वात्मानं श्लाघयन्। इत्येवमुक्तवन्तं ब्रह्मावोचत् तस्मिन्नेवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यमिति। सोऽब्रवीदिदं जगत्सर्वं दहेयं भस्मीकुर्याम्। यदिदं स्थावरादि पृथिव्यामिति। पृथिव्यामित्युपलक्षणार्थम्। यतोऽन्तरिक्षस्थमपि दह्यत एवाग्निना। तस्मै एवमभिमानवते ब्रह्म तृणं निदधौ पुरोऽग्नेः स्थापितवत् ब्रह्मणैतत्तृणमात्मं ममाग्रतो दह न चेदसि दग्धुं समर्थो मुञ्च दग्ध्वाभिमानं सर्वज्ञेत्युक्तस्तत्तृणमुपप्रेयाय तृणसमीपं गतवान्। सर्वजवेन सर्वोत्साहकृतेन वेगेन गत्वा न शशाक नाशकद्दग्धुम्। स जातवेदास्तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञस्तत एव यक्षादेव

तूष्णीं देवान्प्रति निवव्रते निवृत्तः प्रतिगतवान्। नैव तत् यक्षमशकं शक्तवानहं विज्ञातुं विशेषतो यदेतद्यक्षमिति ॥३-६॥

अथ वायुमिति। अथानन्तरं वायुमब्रुवन् हे वायवेतद्विजानीहीत्यादि समानार्थं पूर्वेण। वानाद्गमनाद्गन्धनाद्वायुः। मातरि अन्तरिक्षे श्वयतीति मातरिश्वा। इदं सर्वमप्याददीय गृह्णीयाम्। यदिदं पृथिव्यामित्यादि समानमेव ॥७-१०॥

अथेन्द्रमिति। अथेन्द्रमब्रुवन्मघवन् एतद्विजानीहीत्यादि पूर्ववत्। इन्द्रः परमेश्वरो मघवान् बलवत्त्वात् तथेति तदभ्यद्रवत् तस्मादिन्द्रादात्मसमीपं गतात् तद्ब्रह्म तिरोदधे तिरोभूतमिन्द्रस्येन्द्रत्वाभिमानोऽतितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादाद्ब्रह्म। इन्द्राय तद्यक्षं यस्मिन्नाकाश आकाशप्रदेश आत्मानं दर्शयित्वा तिरोभूतम् इन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाश आसीत्स इन्द्रस्तस्मिन्नेवाकाशे तस्थौ। किं तद्यक्षमिति ध्यायन्न निवव्रतेऽग्न्यादिवत् तस्येन्द्रस्य यक्षे भक्तिं बुद्धा विद्या उमारूपिणी प्रादुरभूत्स्त्रीरूपा। स इन्द्रस्तामुमां बहुशोभमानां सर्वेषां हि शोभमानानां शोभनतमां विद्यां तदा बहुशोभमानेति विशेषणमुपपन्नं भवति। हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा तामुपजगाम। इन्द्रस्तां ह उमां किलोवाच पप्रच्छ ब्रूहि किमेतद्दर्शयित्वा तिरोभूतं यक्षमिति ॥११-१२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छंकरभगवत्पादकृतौ केनोपनिषत्पदभाष्ये तृतीयः खण्डः ॥३॥

Khaṇḍa 4

She said: It is Brahman; for verily in this victory of Brahman you obtained majesty. Hence (from the word of Umā) he (Indra) knew Brahman.

शाङ्करभाष्यम्।—अथ चतुर्थः खण्डः। सा ब्रह्मेति होवाच ह किल ब्रह्मण ईश्वरस्यैव विजय ईश्वरेणैव जिता असुराः, यूयं तत्र निमित्तमात्रं तस्यैव विजये यूयं महीयध्वं महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्तु युष्माकमयमस्माकमेवायं विजयोऽस्माकमेवायं महिमेति। ततस्तस्मात् उमावाक्याद्धैव विदांचकार ब्रह्मेतीन्द्रोऽवधारणात्ततो हैवेति न स्वातन्त्र्येण ॥१॥

No. 3

KAṬHA-UPANIṢAD[1]

The Kaṭha-Upaniṣad, as commented on by Śaṅkara, consists of two parts (Adhyāya), each of them containing three Vallīs. It belongs to the Yajurveda. 'It does not seem likely that we possess it in its original form, for there are clear traces of later additions in it. There is in fact the same story told in the Taittirīya Brāhmaṇa, iii. 11. 8. ff. The Kaṭha has always been considered as one of the best Upaniṣads, and it must be admitted, that in elevation of thought, depth of expression, beauty of its imagery and an ingenuous fervour, few are equal to it.

Chap. 1 Verses 1-9 Vallī 1

1. Being desirous (of reward) once, Vājaśravasa gave away (at a sacrifice) all his possessions (as fee to the priests). Now he had a son called Naciketas.

2. Faith entered into him, though he was but a boy, as the gifts of the sacrifice (*i.e.*, the cows) were being led away, and he pondered:

3. 'Verily joyless are the worlds to which he goes who gives these (decrepit old cows) that have drunk their (last) water, eaten their (last) grass, yielded their (last) milk (*i.e.*, are dry) and have worn out their organs[2] (*i.e.*, are barren).'

4. Then he said to his father: 'Dear father, to whom wilt thou give me?' Twice (he asked) and thrice. Then the father (being angry) said to him: 'To death do I give thee.'

5. (*Naciketas thought*:) 'Among many I go foremost, among many I go midmost. What need has Yama, I wonder, that he will do by me to-day?'

6. (*He said*:) 'Look back, (O father,) how the former men (*i.e.*, your bygone forefathers) did act. Look on, how others (the present good people) do act. Mortal man ripens (and withers) like the corn, like the corn he springs up again.'

[1] For fear of increasing the bulk of this selection we give here only a few introductory stanzas of the famous episode of Yama and Naciketas. Inquisitive students are, however, expected to go through the whole of the interesting conversation, so as to know with what an earnest zeal the boy Naciketas wanted to obtain from Yama the supreme knowledge of Brahman in preference to the fulfilment of all material desires offered to him by the Lord of death.

[2] or, have worn out their strength (to breed).

7. 'Like unto fire incarnate a Brahmin guest makes entry into the house. They make this (offering of water, seat, etc.) his peace-offering; (so) O Vaivasvata,[1] fetch water.'

8. All his hopes and expectations, (the fruits of) fellowship (with the good), (the virtue of) true and pleasant speech and (the fruits of) his sacrifices and works of public utility, all his sons and all his cattle—all this goes from (or, is wrenched from) a foolish man of little wit, in whose house a Brāhmaṇa dwells without any food.

9. (*Yama returns and addresses Naciketas*:) 'Since O Brāhmaṇa, for three nights thou, a guest who should have been revered, hast dwelt in my house unfed, let there be homage to thee and (let there be) welfare to me; therefore do choose three boons in recompense (*i.e.*, one for each night passed without food).

शाङ्कर-भाष्यम्।—ॐ नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च। अथ काठकोपनिषद्वल्लीनां सुखार्थप्रबोधनार्थमल्पग्रन्था वृत्तिरारभ्यते। सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्-प्रत्ययान्तस्य रूपमुपनिषदिति। उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते। केन पुनरर्थयोगेनोपनिषच्छब्देन विद्योच्यते इत्युच्यते। ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्विंसनाद्विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते। तथा च वक्ष्यति 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' इति। पूर्वोक्तविशेषणान् मुमुक्षून्वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगाद्ब्रह्मविद्योपनिषत्। तथा च वक्ष्यति—'ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः' इति। लोकादिर्ब्रह्मयज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगादग्निविद्याऽप्युपनिषदुच्यते। तथा च वक्ष्यति—'स्वर्गलोका अमृतत्वं भजन्ते' इत्यादि।

ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति। उपनिषदमधीमहेऽध्यापयाम इति च। एवं नैष दोषोऽविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवाद्विद्यायां च सम्भवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः। आयुर्वै घृतमित्यादिवत्। तस्माद्विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते ग्रन्थे तु भक्तेति। एवमुपनिषन्निर्वचनेनैव विशिष्टोऽधिकारी विद्यायामुक्तः। विषयश्च विशिष्ट उक्तो विद्यायाः परं ब्रह्म प्रत्यगात्मभूतम्। प्रयोजनं चास्या उपनिषद आत्यन्तिकी संसारनिवृत्तिर्ब्रह्मप्राप्तिलक्षणा। सम्बन्धश्चैवम्भूतप्रयोजनेनोक्तः। अतो यथोक्ताधिकारिविषयप्रयोजनसम्बन्धाया विद्यायाः करतलन्यस्तामलकवत्प्रकाशकत्वेन विशिष्टाधिकारिविषयप्रयोजनसम्बन्धा एता वल्लयो भवन्तीति। अतस्ता यथाप्रतिभानं व्याचक्ष्महे—तत्राख्यायिका विद्यास्तुत्यर्था।

[1] Son of Vivasvat, *i.e.*, the Sun. By this epithet Yama is meant.

उशन्—कामयमानो ह वा इति वृत्तार्थस्मरणार्थौ निपातौ वाजमन्नं तद्दानादिनिमित्तं श्रवो यशो यस्य स वाजश्रवा रूढितो वा तस्यापत्यं वाजश्रवसः किल विश्वजिता सर्वमेधेनेजे तत् फलं कामयमानः। स तस्मिन् क्रतौ सर्ववेदसं—सर्वस्वं धनं ददौ—दत्तवान्। तस्य यजमानस्य ह नचिकेता नाम पुत्रः किल आस—बभूव ॥१॥

तं ह नचिकेतसं कुमारं—प्रथमवयसं सन्तमप्राप्तजननशक्तिं बालमेव श्रद्धाऽऽस्तिक्यबुद्धिः पितुर्हितकामप्रयुक्ताऽऽविवेश—प्रविष्टवती। कस्मिन् काल इत्याह—ऋत्विग्भ्यः सदस्येभ्यश्च दक्षिणासु नीयमानासु विभागेनोपनीयमानासु दक्षिणार्थासु गोषु स आविष्टश्रद्धो नचिकेता अमन्यत ॥२॥

कथमित्युच्यते—पीतोदका इत्यादिना। दक्षिणार्था गावो विशेष्यन्ते। पीतमुदकं याभिस्ताः पीतोदकाः। जग्धं भक्षितं तृणं याभिस्ता जग्धतृणाः। दुग्धो दोहः क्षीराख्यो यासां ता दुग्धदोहाः। निरिन्द्रियाः—अप्रजननसमर्था जीर्णा निष्फला गाव इत्यर्थः। यास्ता एवम्भूता गा ऋत्विग्भ्यो दक्षिणात्वेन ददत्—प्रयच्छन्ननन्दा अनानन्दा असुखा नामेत्येतद् ये ते लोकास्तान् स यजमानो गच्छति (ता ददत्) ॥३॥

तदेवं क्रतुसम्पत्तिनिमित्तं पितुरनिष्टं फलं मया पुत्रेण सता निवारणीयमात्मप्रदानेनापि क्रतुसम्पत्तिं कृत्वेत्येवं मत्वा पितरमुपगम्य स होवाच पितरम्, हे तत—तात कस्मै ऋत्विग्विशेषाय दक्षिणार्थं मां दास्यसि—प्रयच्छसीत्येतत्। एवमुक्तेन पित्रोपेक्ष्यमाणोऽपि द्वितीयं तृतीयमप्युवाच कस्मै मां दास्यसि कस्मै मां दास्यसीति। नायं कुमारस्वभाव इति क्रुद्धः सन् पिता तं ह पुत्रं किलोवाच मृत्यवे—वैवस्वताय त्वा—त्वां दास्यामीति ॥४॥

स एवमुक्तः पुत्र एकान्ते परिदेवयाञ्चकार। कथमित्युच्यते—बहूनां शिष्याणां पुत्राणां वैमि—गच्छामि प्रथमः सन् मुख्यया शिष्यादिवृत्त्येत्यर्थः। मध्यमानां च बहूनां मध्यमो मध्यमयैव वृत्त्यैमि। नाधमया कदाचिदपि। तमेवं विशिष्टगुणमपि पुत्रं मां मृत्यवे त्वा ददामीत्युक्तवान् पिता। स किंस्विद् यमस्य कर्तव्यं प्रयोजनं मया प्रत्तेन करिष्यति यत् कर्तव्यमस्य। नूनं प्रयोजनमनपेक्ष्यैव क्रोधवशादुक्तवान् पिता। तथापि तत्पितुर्वचो मृषा मा भूदित्येवं मत्वा परिदेवनापूर्वकमाह पितरं शोकाविष्टं किं मयोक्तमिति ॥५॥

अनुपश्याऽऽलोचय निभालयानुक्रमेण यथा—येन प्रकारेण वृत्ताः पूर्वेऽतिक्रान्ताः पितृपितामहादयस्तव। तान् दृष्ट्वा च तेषां वृत्तमास्थातुमर्हसि। वर्तमानाश्चापरे साधवो यथा वर्तन्ते तांश्च प्रतिपश्याऽऽलोचय तथा। न च तेषु मृषा करणं वृत्तं वर्तमानं वाऽस्ति। तद्विपरीतमसतां च वृत्तं मृषा करणम्। न च मृषा कृत्वा कश्चिदजरामरो भवति। यतः सस्यमिव मर्त्यो मनुष्यः पच्यते जीर्णो म्रियते मृत्वा च सस्यमिवाऽजायत आविर्भवति पुनरेवमनित्ये जीवलोके किं मृषाकरणेन। पालयाऽऽत्मनः सत्यम्। प्रेषय मां यमायेत्यभिप्रायः ॥६॥

स एवमुक्तः पिताऽऽत्मनः सत्यतायै प्रेषयामास। स च यमभवनं गत्वा त्रिस्रो रात्रीरुवास यमे प्रोषिते। प्रोष्याऽगतं यममभार्या वा ऊचुर्बोधयन्तः—वैश्वानरोऽग्निरेव साक्षात्

प्रविशत्यतिथिः सन् ब्राह्मणो गृहान्दहन्निव। तस्य दाहं शमयन्त इवाग्नेरेतां पाद्यासनादिदानलक्षणां शान्तिं कुर्वन्ति सन्तोऽतिथे यतोऽतो हर—आहर हे वैवस्वतोदकं नचिकेतसे पाद्यार्थम्। यतश्चाकरणे प्रत्यवायः श्रूयते ॥७॥

आशाप्रतीक्षे अनिर्ज्ञातप्राप्येष्टार्थं प्रार्थनाऽऽशा निर्ज्ञातप्राप्यार्थं प्रतीक्षणं प्रतीक्षा ते आशाप्रतीक्षे संगतं सत्सङ्गजं फलं सूनृतां च सूनृता हि प्रिया वाक् तन्निमित्तं च। इष्टापूर्ते इष्टं यागजं पूर्तमारामादिक्रियाजं फलम्। पुत्रपशूंश्च पुत्रांश्च पशूंश्च सर्वानेतत्सर्वं यथोक्तं वृङ्क्त आवर्जयति विनाशयतीत्येतत्। पुरुषस्याल्पमेधसोऽल्पप्रज्ञस्य। यस्यानश्नन्नभुञ्जानो ब्राह्मणो गृहे वसति। तस्मादनुपेक्षणीयः सर्वावस्थास्वप्यतिथिरित्यर्थः ॥८॥

एवमुक्तो मृत्युरुवाच नचिकेतसमुपगम्य पूजापुरःसरम्। तिस्रो रात्रीर्यद्यस्मादवात्सीरुषितवानसि गृहे मे ममानश्नन् हे ब्रह्मन्नतिथिः सन्नमस्यो नमस्कारार्हश्च तस्मान्नमस्ते तुभ्यमस्तु भवतु। हे ब्रह्मन् स्वस्ति भद्रं मेऽस्तु। तस्माद्भवतोऽनशनेन मद्गृहवासनिमित्तादोषात्तत्प्राप्तुपशमेन। यद्यपि भवदनुग्रहेण सर्वं मम स्वस्ति स्यात्तथाऽपि त्वदधिकसंप्रसादनार्थमनशनेनोपोषितामेकैकां रात्रिं प्रति त्रीन् वरान् वृणीष्वाभिप्रेतार्थविशेषान् प्रार्थय यस्य मत्तः ॥९॥

Chap. 1. Verses 1-10. Vallī 2

1. (Yama said:) The good (श्रेयः) is one thing, the pleasant (प्रेयः) another; both these with diverse aims bind man to action. Of these two, well it is for him who accepts the good, who chooses the pleasant fails from the ultimate purpose (of life).

2. Both the good and the pleasant approach man: going all round (*i.e.*, examining) them, the wise distinguish (them); the wise choose the good; the fool choose the pleasant for (the sake of) acquisition and preservation of health or wealth.

3. But, O Naciketas, thou having pondered over (or, examined) all pleasant and sweet-seeming (or, beautiful) objects of desire, hast renounced them. Thou hast not taken to the (vile) path of riches (सृङ्काम्) wherein many men sink to ruin (or, which leads many men to perdition.)[1]

[1] सृङ्काम्—This word has been translated differently by different men. The word has previously occurred in 1. 16 of Kaṭha. Śaṅkara treats it there as meaning '*necklace*' and here as '*way*'. Hume renders by '*garland*' in both the places, but that does not suit the context here.

Whitney—'*slough*' or '*pool*' on the strength of 'मज्जन्ति।'

Deussen—'*chain.*'

Geldner and Charpentier amend मज्जन्ति to सज्जन्ति and translate—'Not having fastened on (or accepted) this chain of riches, wherein so many mortals are entangled.'

4. Wide apart are these two, opposite and divergent—Ignorance (Avidyā) and what is known as Knowledge (Vidyā); I deem Naciketas (to be) eager for knowledge; (for) many covetable things did not deflect you (or, tear thee away).

5. Abiding in the midst of Ignorance, wise in their own eyes or conceit (self-wise), thinking themselves learned, the fools wander about rushing round and round (or go round and round staggering to and fro) like blind men led by the blind.[1]

6. The means of attaining life beyond (or, the Hereafter) does not appear to the careless child deluded by the delusion of wealth. He that thinks that this world is and there is no other, falls again and again into my (death's) thraldom.

7. He (the self) is not easy even to be heard of by many, and of those that hear of him not many can really know him. Wonderful is the person who can speak of this (the self) or attain him ably. Wonderful is the person who can know him, when taught by an able teacher.

8. An ordinary man cannot tell you of this soul; for thus told thou cannot truly know him when he is thought of in many aspects, unless told of him by a supreme mind there is no way into his mystery; for he is subtler than subtlety and logic cannot reach him.

9. That doctrine is not to be obtained by argument, but when it is declared by another, then O dearest, it is easy to understand. Thou hast obtained it now; thou art truly a man of true resolve. May we have always an inquirer like thee.

10. Naciketas said: 'I know that what is called treasure is transient, for the eternal is not obtained by things which are not eternal. Hence the Naciketa fire-sacrifice has been laid by me first; then by means of transient things, I have obtained what is not transient (the teaching of Yama).'

अन्यत् पृथगेव श्रेयो निःश्रेयसं तथाऽन्यदुताप्येव प्रेयः प्रियतरमपि ते प्रेयःश्रेयसी उभे नानार्थे भिन्नप्रयोजने सती पुरुषमधिकृतं वर्णाश्रमादिविशिष्टं सिनीतो बध्नीतस्ताभ्यामात्मकर्तव्यतया

'Thou hast not gone into the road that leadeth to wealth, in which many men perish.' —Max-Müller.

Madhva's commentary—'*fetters*' (the fetters of pleasure which bind unthinking humanity).

[1] *Cf.* Matthew, xv. 14.
"If the blind lead the blind, both shall fall into the ditch."

प्रयुज्यते सवः पुरुषः। श्रेयःप्रेयसोर्ह्यभ्युदयामृतत्वार्थी पुरुषः प्रवर्तते। अतः श्रेयः प्रेयः-प्रयोजनकर्तव्यतया ताभ्यां बद्ध इत्युच्यते सर्वः पुरुषः। ते यद्यप्येकैकपुरुषार्थसम्बन्धिनी विद्याविद्यारूपत्वाद्विरुद्धे। इत्यन्यतरापरित्यागेनैकेन पुरुषेण सहानुष्ठातुमशक्यत्वात्तयोर्हित्वा-ऽविद्यारूपं प्रेयः श्रेय एव केवलमाददानस्योपादानं कुर्वतः साधु शोभनं शिवं भवति। यस्त्व-दूरदर्शी विमूढो हीयते वियुज्यतेऽस्मादर्थात् पुरुषार्थात् पारमार्थिकात् प्रयोजनात् नित्यात् प्रच्यवत इत्यर्थः। कोऽसौ य उ प्रेयो वृणीत उपादत्त इत्येतत् ॥१॥

यद्युभे अपि कर्तुं स्वायत्ते पुरुषेण किमर्थं प्रेय एवाऽऽदत्ते बाहुल्येन लोक इत्युच्यते—सत्यं स्वायत्ते तथाऽपि साधनतः फलतश्च मन्दबुद्धीनां दुर्विवेकरूपे सती व्यामिश्रीभूते इव मनुष्यमेतं पुरुषमा इतः प्राप्नुतः श्रेयश्च प्रेयश्च। अतो हंस इवाम्भसः पयस्तौ श्रेयःप्रेयःपदार्थौ संपरीत्य सम्यक् परिगम्य मनसाऽऽलोच्य गुरुलाघवं विविनक्ति पृथक्करोति धीरो धीमान्। विविच्य च श्रेयो हि श्रेय एवाभिवृणीते प्रेयसोऽभ्यर्हितत्वात्। कोऽसौ धीरः। यस्तु मन्दोऽल्पबुद्धिः स विवेकासामर्थ्याद् योगक्षेमाद् योगक्षेमनिमित्तं शरीराद्युपचयरक्षणनिमित्तमित्येतत् प्रेयः पशुपुत्रादि-रक्षणं वृणीते ॥२॥

स त्वं पुनः पुनर्मया प्रलोभ्यमानोऽपि प्रियान् पुत्रादीन् प्रियरूपांश्चाप्सरःप्रभृतिरक्षणान् कामानभिध्यायंश्चिन्तयंस्तेषामनित्यत्वासारत्वादिदोषान् हे नचिकेतोऽत्यस्राक्षीरतिसृष्टवान् परित्यक्त-वानस्यहो बुद्धिमत्ता तव; नैतामवाप्तवानसि सृङ्कां सृतिं कुत्सितां मूढजनप्रवृत्तां वित्तमयीं धनप्रायाम्। यस्यां सृतौ मज्जन्ति सीदन्ति बहवोऽनेके मूढा मनुष्याः ॥३॥

तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीत इत्युक्तं तत् कस्माद् यतो दूरं दूरेण महताऽन्तरेणैते विपरीते अन्योन्यव्यावृत्तरूपे विवेकाविवेकात्मकत्वात्तमःप्रकाशाविव। विषुची विषूच्यौ नानागती भिन्नफले संसारमोक्षहेतुत्वेनेत्येतत्। के ते इत्युच्यते—या चाविद्या प्रेयोविषया विद्येति च श्रेयोविषया ज्ञाता निर्ज्ञाताऽवगता पण्डितैस्तत्त्व विद्याभीप्सिनं विद्यार्थिनं नचिकेतसं त्वामहं मन्ये। कस्माद् यस्मादविद्वद्बुद्धिप्रलोभिनः कामा अप्सरःप्रभृतयो बहवोऽपि त्वा त्वां नालोलुपन्त न विच्छेदं कृतवन्तः श्रेयोमार्गादात्मोपभोगाभिवाञ्छासम्पादनेन। अतो विद्यार्थिनं श्रेयोभाजनं मन्य इत्यभिप्रायः ॥४॥

ये तु संसारभाजना अविद्यायामन्तरे मध्ये घनीभूत इव तमसि वर्तमाना वेष्टमानाः पुत्रपश्वादितृष्णापाशशतैः स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्रकुशलाश्चेति मन्यमानास्ते दन्द्रम्यमाणा अत्यर्थं कुटिलामनेकरूपां गतिं गच्छन्तो जरामरणरोगादिदुःखैः परियन्ति परिगच्छन्ति मूढा अविवेकिनोऽन्धेनैव दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थं मृच्छन्ति तद्वत् ॥५॥

अतएव मूढत्वान्न साम्परायः प्रतिभाति। सम्परेयत इति सम्परायः परलोकस्तत्प्राप्ति-प्रयोजनः साधनविशेषः शास्त्रीयः साम्परायः स च बालमविवेकिनं प्रति न प्रतिभाति न प्रकाशते

नोपतिष्ठत इत्येतत्। प्रमाद्यन्तं प्रमादं कुर्वन्तं पुत्रपश्वादिप्रयोजनेष्वासक्तमनसं तथा वित्तमोहेन वित्तनिमित्तेनाविवेकेन मूढं तमसाऽऽच्छन्नं सन्तमयमेव लोको योऽयं दृश्यमानः खान्नपानादि-विशिष्टो नास्ति परोऽदृष्टो लोक इत्येवं मननशीलो मानी पुनः पुनर्जनित्वा वशं मदधीनतामापद्यते मे मृत्योर्मम जननमरणादिलक्षण-दुःखप्रबन्धारूढ़ एव भवतीत्यर्थः। प्रायेण ह्येवंविध एव लोकः ॥६॥

यस्तु श्रेयोऽर्थी सहस्रेषु कश्चिदेवात्मविद् भवति त्वद्विधो यस्माच्छ्रवणायापि श्रवणार्थं श्रोतुमपि यो न लभ्य आत्मा बहुभिरनेकैः शृण्वन्तोऽपि बहवोऽनेकेऽन्ये यमात्मानं न विद्युर्न विदन्तश्चभागिनोऽसंस्कृतात्मानो न विजानीयुः। किं चास्य वक्ताऽप्याश्चर्योऽद्भुतवदेवानेकेषु कश्चिदेव भवति। तथा श्रुत्वाऽप्यस्याऽऽत्मनः कुशलो निपुण एवानेकेषु लब्धा कश्चिदेव भवति। यस्मादाश्चर्यो ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेनाऽऽचार्येणानुशिष्टः सन् ॥७॥

कस्मात्—नहि नरेण मनुष्येणावरेण प्रोक्तोऽवरेण—हीनेन प्रकृतबुद्धिनेत्येतदुक्तम् एष आत्मा यं त्वं मां पृच्छसि। न हि सुष्ठु सम्यग्विज्ञेयो विज्ञातुं शक्यो यस्मादहुर्ध्याऽस्ति नास्ति कर्ताऽकर्ता शुद्धोऽशुद्ध इत्यायनेकधा चिन्त्यमानो वादिभिः। कथं पुनः सुविज्ञेय इत्युच्यते—अनन्य-प्रोक्तेऽनन्येनापृथग्दर्शिनाऽऽचार्येण प्रतिपाद्यब्रह्मात्मभूतेन प्रोक्त उक्त आत्मनि गतिरनेकधाऽस्ति-नास्तीत्यादिलक्षणा चिन्ता गतिरत्रास्मिन्नात्मनि नास्ति न विद्यते सर्वविकल्पगतिप्रत्यस्तमित-त्वादात्मनः। अथवा स्वात्मभूतेऽनन्यस्मिन्नात्मनि प्रोक्तेऽनन्यप्रोक्ते गतिरत्रान्याऽवगतिर्नास्ति ज्ञेयस्यान्यस्याभावात्। ज्ञानस्य ह्येषा परा निष्ठा यदात्मैकत्वविज्ञानम्। अतोऽवगन्तव्याभावान्न गतिरत्रावशिष्यते। संसारगतिर्वाऽत्र नास्त्यनन्य आत्मनि प्रोक्ते नान्तरीयकत्वात्तद्विज्ञानफलस्य मोक्षस्य। अथवा प्रोच्यमान ब्रह्मात्मभूतेनाऽऽचार्येण प्रोक्त आत्मन्यगतिरनवबोधोऽपरिज्ञानमत्र नास्ति। भवत्येवागतिस्तद्विषया श्रोतुस्तदस्म्यहमित्याचार्यस्येवेत्यर्थः। एवं सुविज्ञेय आत्माऽऽगमवताऽऽचार्येणानन्यतया प्रोक्तः। इतरथा ह्यणीयान्नणुप्रमाणादपि संपद्यत आत्मा। अतर्क्यमतर्क्यः स्वबुद्ध्याऽभ्यूहेन केवलेन तर्केण। तर्क्यमाणेऽणुपरिमाणे केनचित् स्थापित आत्मनि ततो ह्यणुतरमन्योऽभ्यूहति ततोऽप्यन्योऽणुतममिति न हि कुतर्कस्य निष्ठा क्वचिद्विद्यते ॥८॥

अतोऽनन्यप्रोक्त आत्मन्युत्पन्ना येयमागमप्रतिपाद्यात्ममतिर्नैषा तर्केण स्वबुद्ध्यभ्यूह-मात्रेणापनेया न प्रापणीयेत्यर्थः। नापनेतव्या वा न हातव्या। तार्किको ह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति। अतएव च ये यमागमप्रभूतामतिरन्येनैवागमाभिज्ञेना-चार्येणैव तार्किकात् प्रोक्ता सती सुज्ञानाय भवति हे श्रेष्ठ प्रियतम। का पुनः सा तर्कागम्या मतिरित्युच्यते। यां त्वां मतिं मद्वरप्रसादेनापः प्राप्तवानसि। सत्याऽवितथविषया धृतिर्यस्य तव स त्वं सत्यधृतिर्बतासीत्यनुकम्पयन्नाह मृत्युर्नचिकेतसं वक्ष्यमाणविज्ञानस्तुतये। त्वादृक् त्वत्तुल्यो नोऽस्मभ्यं भूयाद् भवताद् भवत्वन्यः पुनः शिष्यो वा प्रष्टा। कीदृग् यादृक् त्वं हे नचिकेतः प्रष्टा ॥९॥

पुनरपि तुष्ट आह—जानाम्यहं शेवधिर्निधिः कर्मफलरूक्षणो निधिरिव प्राप्यत इति। असावनित्यमनित्य इति जानामि। नहि यस्मादनित्यैरध्रुवैर्नित्यं ध्रुवं तत् प्राप्यते परमात्माख्यः शेवधिः। यस्त्वनित्यसुखात्मकः शेवधिः स एवानित्यैर्द्रव्यैः प्राप्यते। हि यतस्ततस्तस्मान्मयाजानताऽपि नित्यमनित्यसाधनैर्न प्राप्यत इति नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः पश्वादिभिः स्वर्गसुखसाधनभूतोऽग्निर्निर्वर्तित इत्यर्थः। तेनाहमधिकारापन्नो नित्यं याम्यं स्थानं स्वर्गाख्यं नित्यमापेक्षिकं प्राप्तवानस्मि ॥१०॥

No. 4

THE CHĀNDOGYA UPANIṢAD[1]

Adhyāya VI. Khaṇḍa 1.

1. Hari om! Of a truth there lived Svetaketu son of Āruṇi. Unto him said his father, "O Svetaketu, (go and) abide as a Brahmacārin (in the house of a tutor), for verily, child, none of our race has neglected the Vedas and thereby brought disgrace on himself."[2]

2. Of a truth he having repaired to a tutor, on his twelfth year, studied all the Vedas to the twenty-fourth year of his age, returned home, a vain-minded (youth), confident of his knowledge of the Vedas, and proud.

3. Unto him said his father, "O Svetaketu, since you are, child, so vain-minded, so confident of your knowledge of the Vedas, and so proud, have you enquired of our tutor about that subject which makes the unheard-of heard, the unconsidered considered and the unsettled settled?"

4. "What is that subject, O Lord?" "Verily, child, as the knowledge of [the nature of] a single clod of earth makes manifest [the nature of] all earthen objects, [and shews] that the various [fictile] fabrications indicated by different words and names are of a truth only earth.

5. "Child, as the knowledge of [the nature of] a single [lump of] gold, shows that all articles of gold, indicated by different words and names, are mere variations of form but in truth gold alone.

[1] It belongs to the Sāmaveda and is generally regarded as one of the earlier Upaniṣads.

[2] Lit. Has become *Brahmabandhu* or a friend or relation of Brāhmaṇa, but not himself a Brāhmaṇa.

6. "Child, as by a knowledge of the nail-cutter, all iron (steel) instruments are known to be modifications of that substance, differing only in name and words, but of a truth iron alone, so is the subject [I allude to"].

7. "Verily my learned tutors [said Śvetaketu] know it not. Had they known it, why should they have omitted to impart it to me? Lord, do you relate that unto me." "Be it so, child," said the father.

शाङ्कर-भाष्यम्। श्वेतकेतुर्हारुणेय आसेत्याद्यध्यायसम्बन्धः। सर्वं खल्विदं ब्रह्म। कथं तस्माज्जगदिदं जायते तस्मिन्नेव च लीयते अनिति च तेनैवेत्येतद्वक्तव्यम्। अनन्तरं चैकस्मिन् भुक्ते विदुषि सर्वं जगत्तृप्तं भवतीत्युक्तं तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते नात्मभेदे कथं च तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आरभ्यते। पितापुत्राख्यायिका विद्यायाः सारिष्ट्यप्रदर्शनार्था। श्वेतकेतुरिति नामतो हेत्यैतिह्यार्थः। आरुणेयोऽरुणस्य पौत्र आस बभूव। तं पुत्रं हारुणिः पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालात्ययं च पश्यन्नुवाच हे श्वेतकेतोऽनुरूपं गुरुं कुलस्य नो गत्वा वस ब्रह्मचर्यम्। न चैतद् युक्तम् यदस्मत्कुलीनो ह सर्वाननूच्य अनधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान् बन्धून् व्यपदिशति न स्वयं ब्राह्मणवृत्त इति ॥१॥

तस्यातः प्रवासोऽनुमीयते पितुः। येन स्वयं गुणवान् सन् पुत्रं नोपनेष्यति। स पितोक्तः श्वेतकेतुर्हं द्वादशवर्षः सन्नुपेत्याचार्यं यावच्चतुर्विंशतिवर्षो बभूव तावत् सर्वान् वेदांश्चतुरोऽप्यधीत्य तदर्थं च बुद्ध्वा महामना महद्गम्भीरं मनो यस्याससमात्मानमन्यैर्मन्यमानं मनो यस्य सोऽयं महामना अनूचानमानी अनूचानमात्मानं मन्यत इत्येवंशीलो यः सोऽनूचानमानी स्तब्धोऽप्रणतस्वभाव एयाय गृहम्। तमेवंभूतं हाऽऽत्मनोऽननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाच सद्धर्मावतारचिकीर्षया। श्वेतकेतो यन्विदं महामना अनूचानमानी स्तब्धश्चासि कस्तेऽतिशयः प्राप्त उपाध्यायादुतापि तमादेशमादिश्यत इत्यादेशः केवलशास्त्राचार्योपदेशगम्यमित्येतद् येन वा परं ब्रह्मादिश्यते स आदेशस्तमप्राक्ष्यः पृष्टवानस्याचार्यम् ॥२॥

तमादेशं विशिनष्टि येनाऽदेशेन श्रुतेनाश्रुतमप्यन्यच्छ्रुतं भवत्यमतं मतमतर्कितं तर्कितं भवत्यविज्ञातं विज्ञातमनिश्चितं निश्चितं भवतीति। सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न जानातीत्याख्यायिकातोऽवगम्यते। तदेतदद्भुतं श्रुत्वाऽऽह कथं न्वेतदप्रसिद्धमन्यविज्ञानेनान्यद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति कथं नु केन प्रकारेण हे भगवः स आदेशो भवतीति ॥३॥

यथा स आदेशो भवति तच्छृणु हे सौम्य। यथा लोक एकेन मृत्पिण्डेन रुचककुम्भादिकारणभूतेन विज्ञातेन सर्वमन्यच्चद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात्। कथं मृत्पिण्डे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात्। नैष दोषः। कारणे नानन्यत्वात् कार्यस्य। यन्मन्यसेऽन्यस्मिन् विज्ञातेऽन्यन्न ज्ञायत इति। सत्यमेवं स्यात्। यद्यन्यत् कारणात् कार्यं

स्यात् न खेवमन्यत् कारणात् कार्यम्। कथं तर्हीदंलोक इदं कारणमयमस्य विकार इति। शृणु। वाचाऽऽरम्भणं वागारम्भणं वागालम्बनमित्येतत्। कोऽसौ विकारो नामधेयं नामैव नामधेयं स्वार्थे धेयप्रत्ययः। वागालम्बनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति परमार्थतो मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्त्वस्ति ॥४॥

यथा सोम्यैकेन लोहमणिना सुवर्णपिण्डेन सर्वमन्यद्विकारजातं कटकमुकुटकेयूरादि विज्ञातं स्यात्। वाचारम्भणमित्यादि समानम् ॥५॥

यथा सोम्यैकेन नखनिकृन्तनेनोपलक्षितेन कृष्णायसपिण्डेनेत्यर्थः। सर्वं काष्णायसं कृष्णायसविकारजातं विज्ञातं स्यात्। समानमन्यत्। अनेकदृष्टान्तोपादानं दार्ष्टान्तिकानेकभेदानुगमार्थं दृढप्रतीत्यर्थं च। एवं सोम्य स आदेशो यो मयोक्तो भवतीत्युक्तवति पितर्याहेतरो न वै नूनं भगवन्तः पूजावन्तो गुरवो मम ये त एतद् यद् भवदुक्तं वस्तु नावेदिषु र्न विज्ञातवन्तो नूनम्। यद् यदि ह्यवेदिष्यन् विदितवन्त एतद्वस्तु कथं मे गुणवते भक्तायानुगताय नावक्ष्यन् नोक्तवन्तस्तेनाहं मन्ये न विदितवन्त इति। अवाच्यमपि गुरोर्न्यग्भावमवादीत् पुनर्गुरुकुलं प्रति प्रेषणभयात्। अतो भगवन् मे मह्यं तद्वस्तु येन सर्वज्ञत्वं ज्ञातेन मे स्यात्तद्ब्रवीतु कथयत्वित्युक्तः पितोवाच तथाऽस्तु सोम्येति ॥६-७॥

इति षष्ठाध्याये प्रथमः खण्डः।

No. 5

ŚVETĀŚVATARA UPANIṢAD[1]

Chapt. III[2]

Verses 1-10

1. He, who is only one, possessed of delusion (*māyā*) rules by his ruling powers, rules all the world by his ruling powers,—he, who is ever one—in their (the worlds') origin and manifestation. They, who know him, become immortal.

[1] The Svet. Up. belongs to the Black Yajur-veda. As the mythological views of this Up. are those of a later time, when the worship of Śiva and of the divine Śaktis had gained ground, the European scholars are of opinion that this Up. does not belong to the series of the more ancient Upaniṣads.

[2] "This chapter generally shows in what way the absolute god becomes involved in the relation of the universal and individual soul. It must be understood, that throughout the chapter, the majesty of the Supreme soul is displayed, and not of the universal ruler (Īśvara) whose attributes are contrary to those of the individual soul.

2. For it is one Rudra only[1]—(the knowers of Brahma) acknowledge not a second—who rules these worlds with his ruling powers, who dwells within every man, and who having created all the worlds (and being their) protector, gets wrathful at the time of the end (destroys them).

3. He is the eye of all, the face of all, the arm of all, nay the foot of all. He joins man with arms the bird with wings, the one god, when creating the heaven and the earth.

Note.—This verse is taken from the Vāj. S. 13. 19.

4. May Rudra, the lord of the universe, the all wise (maharṣi), who produced the gods and gave them majesty, and who created at first Hiraṇyagarbha.—strengthen us with auspicious intellect.

5. With thy form, O Rudra, which is auspicious, which is not dreadful (or which is exceedingly dreadful) and which manifests what is holy, with that all-blessed form, O dispenser of happiness from the mountain, look upon us.

6. O dispenser of happiness from the mountain, make propitious the arrow, which thou holdest in thy hand to throw upon the creatures; O Guardian of the mountain, do not injure man or the world.

अतवे—in order to throw; the Vedic Infinitive form of √अस्, to throw. Vv. 5 and 6 are taken from the Vāj. S. 16. 2-3.

7. Those who know Brahma, who is greater than the universe, the great one, the infinite, who is concealed within all beings according to their bodies, the only pervador of the whole universe, the ruler—become immortal.

8. I know that perfect, infinite spirit, who is like the Sun after darkness. Thus knowing, a person overcomes death; there is no other road for obtaining liberation.

Note.—Taken from the Vāj. S. 31. 8. The second part of the first distich is literally found in Bhag. G. 8. 9.

9. By him, than whom nothing is greater, than whom nothing more subtle, nothing older, who one alone stands in the heavens like an unshaken tree, by him, the perfect (Puruṣa), all this is pervaded.

10. Those who know him as different from the cause of that (world), as destitute of form and pain, become immortal; again to the others unhappiness is allotted.

[1] Rudra represents here the Supreme spirit.

शाङ्कर-भाष्यम्। कथमद्वितीयस्य परमात्मन ईशित्रीशितव्यादिभाव इत्याशङ्क्याह। य एक इति। य एकः परमात्मा स जालवान् जालं माया दुरत्ययत्वात्। तथा चाह भगवान्—"मम माया दुरत्यये"ति। तद्वांस्तदस्यास्तीति जालवान् मायावीत्यर्थः। ईशत ईष्टे मायोपाधिः सन्। कैरीशनीभिः स्वशक्तिभिः। तथा चोक्तम्। ईशत ईशनीभिः। परमशक्तिभिरिति। कान् सर्वां-ल्लोकानीशत-ईशनीभिः। कदा। उद्भवे विभूतियोगे सम्भवे प्रादुर्भावे च। य एतद्विदुरमृता अमरणधर्माणो भवन्ति ॥१॥

कस्मात् पुनर्जालवानित्याशङ्क्याह—एको हीति। हिशब्दो यस्मादेक एव रुद्रः स्वतो न द्वितीयाय वस्त्वन्तराय तस्थुर्ब्रह्मविदः परमार्थदर्शिनः। उक्तं च—एको रुद्रो न द्वितीयाय तस्थुरिति। य इमाँल्लोकानीशते नियमयतीशनीभिः। सर्वांश्च जनान् प्रत्यन्तरः प्रतिपुरुष-मवस्थितः। रूपं रूपं प्रतिरूपो बभूवेत्यर्थः। किं च। संचुकोचान्तकाले प्रलयकाले। किं कृत्वा संसृज्य विश्वा भुवनानि गोपा—गोप्ता भूत्वा। एतदुक्तं भवति—अद्वितीयः परमात्मा। न चासौ कुम्भकारवदात्मानं केवलं मृत्पिण्डस्थानीयमुपादानकारणमुपादत्ते किं तर्हि स्वशक्ति-विक्षेपं कुर्वन् स्रष्टा नियन्ता चाऽभिधीयत इति। उत्तरो मन्त्रस्तस्यैव विराडात्मनाऽवस्थानं तत्-स्रष्टृत्वं प्रतिपादयति ॥२॥

विश्वतश्चक्षुरिति। सर्वप्राणिगतानि चक्षूंष्यस्येति विश्वतश्चक्षुः। अतः स्वेच्छयैव सर्वत्र चक्षूरूपादौ सामर्थ्यं विद्यत इति विश्वतश्चक्षुः। एवमुत्तरत्र योजनीयम्। संबाहुभ्यां धमति संयोजयतीत्यर्थः। अनेकार्थत्वाद्धातूनाम्। पक्षिगश्च धमति द्विपदो मनुष्यादींश्च पतत्रैः। किं कुर्वन् द्यावापृथिवी जनयन् देव एको विराजं सृष्टवानित्यर्थः ॥३॥

इदानीं तस्यैव सूक्ष्मसृष्टिं प्रतिपादयन्मन्त्रद्वयाभिप्रेतं प्रार्थयते—यो देवानामिति। यो देवानामिन्द्रादीनां प्रभवहेतुरुद्भवहेतुश्च। उद्भवो विभूतियोगः। विश्वस्याधिपो विश्वाधिपः पालयिता। महर्षिः। महांश्चासावृषिश्चेति महर्षिः सर्वज्ञ इत्यर्थः। हिरण्यं रमणीयमत्युज्ज्वलं ज्ञानं गर्भोऽन्तःसारो यस्य तं जनयामास पूर्वं सर्गादौ। स नोऽस्मान् बुद्ध्याशुभया संयुनक्तु परमपदं प्राप्नुयामेति ॥४॥

पुनरपि तस्य स्वरूपं दर्शयन्नभिप्रेतमर्थं प्रार्थयते मन्त्रद्वयेन। या ते रुद्रेति। हे रुद्र तव या शिवा तनूरघोरा। उक्तञ्च तस्यैते तनवो घोराऽन्या शिवाऽन्येति। अथवा शिवा शुद्धाऽविद्या-तत्कार्यविनिर्मुक्ता सच्चिदानन्दाद्वयब्रह्मरूपा न तु घोरा शशिबिम्बमिवाऽह्लादिनी। अपापकाशिनी स्मृतिमात्राघनाशिनी पुण्याभिव्यक्तिकरी। तयाऽत्मना नोऽस्माञ्शंतमया सुखतमया पूर्णानन्द-रूपया हे गिरिशन्त गिरौ स्थित्वा शं सुखं तनोतीति। अभिचाकशीहि अभिपश्य निरीक्षस्व श्रेयसा नियोजयस्वेत्यर्थः ॥५॥

किञ्च—यामिषुमिति। यामिषुं गिरिशन्त हस्ते बिभर्षि धारयस्यस्तवे जने क्षेप्तुं शिवां गिरिश गिरिं शृणात इति तां कुरु मा हिंसीः पुरुषमस्मदीयं जगदपि कृत्स्नं साकारं ब्रह्म प्रदर्शयेत्यभिप्रेतमर्थं प्रार्थितवान् ॥६॥

इदानीं तस्यैव कारणात्मनाऽवस्थानं दर्शयज्ज्ञानादमृतत्वमाह—ततः परमिति। ततः पुरुषयुक्ताज्जगतः परं कारणत्वात् कार्यभूतस्य प्रपञ्चस्य व्यापकमित्यर्थः। अथवा ततो जगदात्मनो विराजः परम्। किं तद्ब्रह्मपरं बृहन्तं ब्रह्मणो हिरण्यगर्भात् परं बृहन्तं महद्व्यापित्वात्। यथानिकायं यथाशरीरं सर्वभूतेषु गूढमन्तरवस्थितं विश्वस्यैकं परिवेष्टितारं सर्वमन्तः कृत्वा स्वात्मना सर्वं व्याप्यावस्थितमीशं परमेश्वरं ज्ञात्वाऽमृता भवन्ति ॥७॥

इदानीमुक्तमर्थं द्रढयितुं मन्त्रदगनुभवं दर्शयित्वा पूर्णानन्दाद्वितीयब्रह्मात्मपरिज्ञानादेव परमपुरुषार्थप्राप्तिर्नान्येनेति दर्शयति—वेदाहमेतमिति। वेद जाने तमेतं परमात्मानम्। अथैतं प्रत्यगात्मानं साक्षिणं पुरुषं पूर्णं महान्तं सर्वात्मत्वात्। आदित्यवर्णं प्रकाशरूपं तमसोऽज्ञानात् परस्तात्तमेव विदित्वाऽतिमृत्युमेति मृत्युमत्येति। कस्मादस्मान्नान्यः पन्था विद्यतेऽयनाय परमपदप्राप्तये ॥८॥

कस्मात् पुनस्तमेव विदित्वाऽति मृत्युमेतीत्युच्यते—यस्मादिति। यस्मात् परं पुरुषात् परमुत्कृष्टमपरमन्यन्नास्ति। यस्मान्नाणीयोऽणुतरं न ज्यायो महत्तरं वाऽस्ति। वृक्ष इव स्तब्धो निश्चलो दिवि द्योतनात्मनि स्वे महिम्नि तिष्ठत्येकोऽद्वितीयः परमात्मा तेनाद्वितीयेन परमात्मनेदं सर्वं पूर्णं नैरन्तर्येण व्याप्तं पुरुषेण पूर्णेन ॥९॥

इदानीं ब्रह्मणः पूर्वोक्तकार्यकारणतां दर्शयज्ज्ञानिनाममृतत्वमितरेषां च संसारित्वं दर्शयति—तत इति। तत इदंशब्दवाच्याज्जगत उत्तरं कारणं ततोऽप्युत्तरं कार्यकारणविनिर्मुक्तं ब्रह्मैवेत्यर्थः। तदरूपं रूपादिरहितम्। अनामयमाध्यात्मिकादितापलयरहितत्वात्। य एतद्विदुरमृतत्वेनाह-मस्मीत्यमृता अमरणधर्मास्ते भवन्ति। अथेतरे ये न विदुस्ते दुःखमेवापियन्ति ॥१०॥

APPENDIX I

VEDIC GRAMMAR*

Vedic Prefixes (Upasargas)

1. In the Vedas, upasargas often stand separated from the verbs they qualify, by one or more intervening words.

E.g.—नि होता सत्सि बर्हिषि (pfx. नि to be taken with सत्सि), vi. 16. 10; उप त्वाग्ने ··· एमसि (उप to be connected with इमसि), v. 7, No 1; similarly आ चाग्निन् सत्सि बर्हिषि, v. 8, No. 2; प्र विश्वदेवं यूथमृ, v. 3, No. 6; अभि पार्थो अश्याम्, v. 5, No. 6; अनु व्रतं वरसि विश्ववारे, v. 1, No. 7; निरंहसः निर्गता निरवद्यात्, v. 6, No. 11.

2. Sometimes upasargas are placed after the verbs.

E.g.—हर्यश्वाय बर्हया समापीन् (बर्हय सम् instead of सम्बर्हय), v. 12, No. 4; वायविन्द्रश्च सुन्वत आयातमुप निष्कृतम् (आयातमुप instead of उपायातम्), i. 2. 6; हरिभ्यां याह्योक आ (याहि ... आ instead of आयाहि), vii. 32. 4 (SV. 1. 293).

3. The prefixes प्र, सम्, उप and उत्, when repeated twice, are expletives (पादपूरणे). E.g., प्रप्र वयमस्य जातवेदसं प्रियं मितं न शंसिषम्, vi. 48. 1 (SV. 1. 35); प्रपायमग्निर्भरतस्य शस्वे। उपोप मे परामृश। किं नोदुदु हर्षसे दातवा उ—काशिका।

4. Sometimes the mere mention of a pfx. (उपसर्ग) supplies the appropriate verb. E.g., मघवन् ... वि द्विषो वि मृधो जहि, (the first वि supplies जहि after it to fit in with the context), viii. 61. 13 (S. V. 1. 274); आ शन्तम शन्तमाभिरभिष्टिभिरा स्वापे, come, most auspicious, with most salutary blessings, come good friend (here आ stands for आगच्छ), viii. 53. 5 (SV. 1. 282).

Vedic Sandhi

Vowel Sandhi.

5. Sometimes final आ of the preceding word is not joined in sandhi with initial अ of the next word, even in the written text of the RV., within a pāda, or between the pādas of a hemistich. E.g., स्वधा अवस्तात्, v. 5. No. 30; मनोया। अग्निः, i. 70. 1; मनोया अभ्यर्षति, i. 101. 7; पूषा अविदत्, x. 26. 1; ईया अच.

* Here are given only the essential rules necessary for the solution of gram difficulties arising from the texts appearing in the foregoing pages, illustrated with examples chosen mostly from them.

1 व्यवहिताश्च, Pāṇ. i. 4. 82.

2 छन्दसि परेऽपि च, i. 4. 81.

3 प्रसमुपोदः पादपूरणे, viii. 1. 6.

4 उपसर्गश्रुतेर्योग्यक्रियाध्याहारः—Sāy. in his comm. on SV. 1. 282, Cal. Skt. Series, p. 360.

5 For the rules 5 to 8 above *vide* Macdonell, Stu. Ved. Gram., Paras. 18a, 19 and f.n.; also Vārtt. rule ईया-अचादीनां छन्दसि प्रकृतिभावो वक्तव्यः।

6. Similarly आ+इ remain sometimes uncontracted.

E.g.—ज्या इयम्, vi. 75. 3; पिबा इमाम्; का ईमिरे।

7. So also occasionally contraction of उ or ऊ+उ or ऊ does not take place:

E.g.—सु ऊर्ध:, सु ऊतय:।

8. अ or आ+ऋ remain always unchanged, and are never contracted to अर्, in the written text of RV. The preceding आ is always shortened or nasalized before ऋ. E.g., न ऋते, v. 9, No. 3; for other examples, see note thereon, p. 131.

9. The initial अ of a word after the final ए or ओ of the preceding word in the same pāda of a Vedic verse does not allow sandhi, and is retained in its original form, except when अ is followed by व or य.

E.g.—यो अस्तरित्र विममे, v. 2, No. 3; एषो अस्मि, सो अर्य:, v. 5, No. 3; यो अपां नेता, v. 7, *ib*.; यो अहिं जघान, v. 11, *ib*.; पाथो अश्याम्, v. 5, No. 6; पाजो अश्येत्, v. 5, No. 7; सुजाते अश्वसूनृते, v. 79. 1.

10. Mark the exception when अ is followed by व or य:—योऽविता (here sandhi takes place), v. 6, No. 3; similarly तेऽवदन्, x. 109. 1

11. Exceptions to the above exception:—But the words अव्यात्, अवद्यात्, अवक्रमु:, अवत, अयम्, अवन्तु, अवस्यु (though initial अ of these words is followed by व or य) retain their अ after final ए or ओ of the preceding word.

E.g.—अग्नि: ... नो अव्यात्; मिवमही अवद्यात्, iv. 4. 15; मा शिवासो अवक्रमु:, vii. 32. 27; संदृष्टौ अवताम्, ix. 73. 5; शतधारो अयं मणि:; ते नो अवन्तु; कृधिकासो अवस्यव:, iii. 42. 9.*

12. वि+ऋच=व्रच, for the rule *vide* note on येन व्रचेन, Ait. Br., para. IV, p. 376.

Consonant Sandhi.

13. The final न् before vowels is changed into अनुनासिक (ँ) after a long vowel within a pāda.

E.g.—दैवान् एह=दैवाँ एह, v. 2, No. 2; महाँ आदित्य:, v. 5, No. 17; similarly महाँ असि (महान् असि), iii 46. 2; [illegible] इन्द्रो द ओजसा, viii. 6. 1.

14. Visarga is optionally replaced in the Vedas by स् before a guttural (क, ख) or labial (प, फ), but not before प nor before a word (with an initial guttural or labial) doubly repeated.

[9] प्रकृत्यान्त:पादमव्यपरे, Pāṇ. vi. 1. 115.

[10] अव्यादवद्यादवक्रमुरव्रतायमवन्ववस्युषु च, vi. 1. 116

* We, however, find in the RV. examples like ते नोऽवन्तु, x. 77. 8; तेऽवन्त्वस्मान्, v. 5, No. 25; सोऽयमागात्; तेऽवदन्भिः, i. 88. 2, which are to be explained by *bahulam*.

[11] दीर्घादटि समानपादे, Pāṇ. viii. 3. 9: and अतोऽटि नित्यम्, viii. 3. 3.

[12] छन्दसि वाऽप्राम्रेडितयो:, iii 3. 49.

E.g.—ऋतस्कविः, viii. 60. 5; गिरिर्न विश्वतस्पृधः, viii. 98. 4; but before प्र, visarga is not so changed:—चत्रिः प्र विक्षान्, AV. v. 26. 1; similarly no such change takes place before a word doubly used:—इदम इदम: परि; आपः पुनन्तु पृथिवीम्। पुनन्तु ब्रह्मणस्पतिः। As the rule is optional, mark that visarga is not so changed in वसुनः पूर्व्यः पतिः, x. 48. 1.

(*a*) Note other cases where visarga is changed into स under similar conditions. अपः कः—अपस्कः; similarly वज्रमस्करत्, etc., but no change in अदितिः करत्।

(*b*) Visarga of the gen. case, sg. is changed into स् before पति, पुत्र पृक्ष, पार, पद, पयस् and पोष। E.g., वाचस्पतिः, x. 81. 7; दिवस्पुत्राय सूर्याय, x. 37. 1; दिवस्पृष्ठम्, iii. 2. 12; तमसस्पारम्, i. 92. 6, etc.

15. The three pronouns सः (nom. masc. sg.), स्यः and एषः, drop the visarga before all consonants. सः, however, in two places retains it in the RV.: सः पलिक्नीः, v. 2. 4; सस्तव (सः + तव), viii. 33. 10.

(*a*) स (after the elision of the visarga) is irregularly combined with a following vowel. It is often found in the RV. E.g., सः + इति = सेति, v. 5, No. 3.; for other similar examples, see note thereon, p. 128.

Prolongation of Vowels in the Vedic Samhitā Text.

16. The final अ of अष्टन् is prolonged, when it is the first member of a compound. E.g., अष्टापदी (class. Skt. अष्टपदी).

17. The final अ of सोम, अन्न, इन्द्रिय and विश्वदेव्य is prolonged before *aff.* मतुप्. E.g., अन्नावतीम्, x. 97. 7; विश्वदेव्यावता, x. 170. 4.

18. The final इ of ओषधि is prolonged before all case terminations except nom. E.g., ओषधीभ्यः, ओषधीषु। In nom. case the word ओषधि is declined as ओषधिः, ओषधी, ओषधयः।

19. The final vowels of the indec. particles तु, नु, च, मयु and तङ् [imp. 2. pl. term. त and not its substitute तप् (by Pāṇ. vii. 1. 45); त being ङित् is treated as ङित्, so equivalent to तङ्, but this is not the case with तप् which is पित्], कु, the suffix त, and the word उरुष्य are prolonged in the Saṃhitā text (not in the pada text). E.g., आ तू न इन्द्र इतऊती, iv. 32. 1; नू मतेः; उत वा घा; मयु

14a कः-करत्-करति क्रुधि-क्रुतेष्वनदितेः, Pāṇ. viii. 3. 50.

14b षढाः पतिपुत्रपृक्षपारपदपयस्पोषेषु, viii. 3. 53. Read also in this connection the rules of Pāṇ. viii. 3. 51, 52, 54.

15 Macdonell, Stu. Ved. Gram., para. 48 and f.n. 2, 3; also स्यश्छन्दसि बहुलम्, Pāṇ. vi. 1. 133. (स्यः is nom. masc. sg. of त्यद्), —स्यः + भानुः—स्य भानुः।

16 छन्दस्युभयथा, Pāṇ. vi. 3. 126; 17 मन्ने सोमापेन्द्रिय-विश्वदेव्यस्य मतौ vi. 3. 131;

18 ओषधेश्च विभक्तावप्रथमायाम्, vi. 3. 132.

गोमन्तमोमवे (मत्, an indec., mg. swiftly); यमाय जुहुता हविः, v. 13, No. 24, see note on जुहोत (where there is no prolongation of the final अ) v. 14, No. 24, p. 279; कृमना; ; अवा ते मद्रा।

20. In the Saṃhitā text, the final vowels of the preceding words ending in इ or उ are prolonged before the indec. particle सु।

E.g.—अग्नी षु णः सखीनाम्, iv. 31. 3; ऊर्ध्व ऊ षुण ऊतये, i. 36. 13 (SV. 1. 57)

21. The final अ of a verb consisting of two vowels (syllables)—commonly imp. sg. form—is prolonged in Sam. text.

E.g.—उदचा (उद् अचा), v. 8, No. 15; परि दीया, v. 7, No. 15; विद्मा हि, iii. 42. 6; अवे रचा णो अंहसः, vii. 15. 13 (SV. 1. 24).

22. The final अ of an indec. is prolonged in Sam. text. E.g., अच्छा यो देवोसुषतम् (अच्छ = अभि, towards), v. 5, No. 7; अद्या देवा उदिता सूर्यस्य, v. 6, No. 11; एवा हि ते।

23. In other words also, over and above the aforesaid cases, the prolongation of the final vowel is found to take place. E.g., चक्रमा, v. 1, No. 4; वही, v. 4, No. 4; सचस्वा, v. 9, No. 1; विप्रता, v. 6, No. 11; धासथा, v. 2, No. 13; चातयस्वा, v. 2, No. 19; स्या, v. 1, No. 21; पूरुषः, vv. 3 and 5, No. 26.

Vedic Declension.

24. The case terminations admit various substitutes. Sometimes (1) they are substituted for by सु (nom. sg. term.), sometimes (2) they drop, leaving the word in its base form, (3) sometimes they are substituted for by the final vowel of the stem which precedes (*i.e.*, the final vowel of the stem and the same vowel substituted for the case-term., both appear combined in the form of a long vowel—पूर्वसवर्णदीर्घ), (4) by आ, (5) आत्, (6) ग्रै, (7) या, (8) डा, (9) द्या, (10) याच्, (11) धाल्, (12) इया, (13) शेडियाच्, (14) ईं.

E.g.—(1) substitution of सु (nom. sg. term.)—ऋजवः सन्तु पन्थाः (for पन्थानः), x. 85. 23; (2) लुक् (elision)—परमे व्योमन्, v. 8, No. 24; यो दासं वर्णमधरं गुहाकः [गुहा = गुहायाम्], v. 4, No. 3; (3) पूर्वसवर्ण and consequent prolongation, दृष्टुती (दृष्टुत्या), सङ्कती (सङ्कत्या), v. 4, No. 19; दृष्टुती = दृष्टुति + instr. sg. term. टा, which is substituted for by पूर्वसवर्ण (इ + इ = दृष्टुति + इ = दृष्टुती; (4) ऊती for ऊतये, v. 14, No. 3; आ substitute—अश्विना (for अश्विनौ), रथितमा (-मौ), etc., v. 2, No. 9; विद्या (-द्यौ), यविष्ठता (-तौ), v. 1, *ib.* मित्रावरुणा (-णौ) v. 1, No. 28, nom.

For [19], [20] *vide* Pāṇ. rules सखि सु-न-घ-नभ्-तङ्-कु-चोरुथाद्याम्, vi. 3. 133; इक: सुञि, vi. 3. 134. For [21], [22], [23] *vide resp.* rules of Pāṇ. अचोऽन्त्यादि:, vi. 3. 135, निपातस्य च, vi. 3. 136, अन्येषामपि दृश्यते, vi. 3. 137.

[24] सुपां सु-लुक्-पूर्वसवर्णाच्छे-या-डा-द्या-दाजाः, Pāṇ. vii. 1. 39, and the Vārt. rule :—इया-डियाजीकाराणामुपसंख्यानम्।

du. term. यौ becomes या; (5) आत्—नतात् ब्राह्मणम् (नतात्=नतम्); (6) भे—युष्मे (for युष्मासु), viii. 68. 19; अस्मे (for अस्मभ्यम्), iv. 49. 4; (7) या—उरुया, धृष्णया (for उरुणा, धृष्णुना); (8) डा—नाभा (for नाभौ) पृथिव्याः. i. 143. 4. मध्या (for मध्ये), v. 4, No. 11; उदिता (उदितौ) सूर्यस्य, v. 6, No. 11; (9) आ—अनु-आ (for अनुत्रया, instr. sg. of the word अनुत्रा, dr. अनु+√त्रा+aff. अङ्, fem. आ), Ait. Br. 2. 6. 15; (10) याच्—साधया (for साधु, neu. accus. sg.); (11) आत्—वसना वसीत (for वसने); (12) इया—उर्विया for उरुणा), दार्विया (for दारुणा); (13) त्रियाच्—सुषेविया (for सुषेविणा), त्रिति ट्रिलोयः; (14) ऐ—सरसी (for सरसि, loc. sg.) शयानम्, vii. 103. 2.

25. In nom and voc. pl. term. (जस्), the words (masc. or fem.) ending in अ or आ optionally take अस् (असुक्) at the end.

E.g.—जनासः—optional form for जनाः, vv. 1-15, No. 3; अश्वासः, रथासः, v. 7, No. 3; ऊर्ध्वासः (ऊर्ध्वाः) v. 9, No. 4; विप्रासः (विप्राः), v. 21, No. 5.

26. The nom. and accus. pl. forms of a neu. word end in या more frequently than in यानि. Sometimes both the forms in या and in यानि occur side by side in the same verse.

E.g.—विश्वा (विश्वानि)...कृतानि, v. 4, No. 3; वी पूर्षा (for षीणि पूषाणि) मघना पदानि, v. 4, No. 6; भुवनानि विश्वा (विश्वानि), *ibid.*; यादोऽस्य विश्वा भूतानि, v. 3, No. 26.

27. ऐस् is not always substituted for भिस् (instr. pl. term.) after nouns ending in अ. Sometimes both the altern. forms in भिस् (एभिः) and ऐस् occur side by side in the same verse.

E.g.—अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत, v. 2, No. 1; see note on पूर्वेभिः and नूतनैः there, p. 105; देवेभिः, v. 5, No. 1; पदेभिः, v. 3. No. 6; कर्त्रेभिः, v. 1, No. 28.

28. The fem. stems ending in इ and उ in nom. pl. are very frequently declined like accus. pl., and in nom. and accus. du. remain in their base forms. E.g.—उशतीः for उशत्यः (nom. pl.) v. 2, No. 21; यं नो देवीः (for देव्यः) अभिष्टये आपः, v. 4, *ib.*; यावो ह्नः...ह्वतीः (for ह्वत्यः)...जनयन्तीः (जनयन्त्यः) अग्निम्, v. 7, No. 27.

Declension of a stem (masc.) ending in अ: Nom.—sg. देवः; du. देवा, देवौ; pl. देवाः, देवासः; Accus.—sg., pl. as in class. Skt.; du. देवा, देवौ; Instr. sg. देवेन, देवा; du. as in class. Skt.; pl. देवैः, देवेभिः; Dat., Abl., Gen., Loc. in all nos. as in class. Skt.; Voc. pl. देवाः, देवासः.

Stem in आ (fem.):—Nom. and Voc. pl. लताः, लतासः; Instr. sg. लतया, लता; in the rest, it is declined as in class. Skt.

Stem in अ (neu.):—Nom., Accus. sg. विश्वम्; du. विश्वे; pl. विश्वा, विश्वानि; in the rest, it is declined like masc. stem in अ (देव) above.

Stem in इ (masc., fem.):—Instr. sg. गया, रुचिना [masc.—a very few stems (only five) form their Instr. sg. like गया, but many others (about 25) like

[25] आज्जसेरसुक्, Pāṇ. vii. 1. 50.
[26] शेश्छन्दसि बहुलम्, vii. 1. 7.
[27] बहुलं छन्दसि, vii. 1. 10.
[28] वा छन्दसि, vi. 1. 106.

ग्रचिना]; Loc. sg. ग्रचा, ग्रची; in the rest, it is declined as in class. Skt. In Dat., stem ऊति (fem.), however, often takes the form ऊती, v. 14, No. 3; in Loc. sg. mark उदिता (for उदिती of the stem उदिति (fem.) v. 6, No. 11; fem. Instr. sg. form of the stem in इ—ग्रच्या, ग्रची.*

Stems in अन् (masc.):—Nom. du. राजाना, राजानौ; Loc. sg. राजनि, राजन्; in other case terms. it is declined as in class. Skt. Nom. pl. (neu.) कर्माणि, कर्मा, कर्म; Loc. sg. कर्मन्, कर्मणि; *cf.* परमे व्योमन् (for व्योमनि), v. 8, No. 24; मित ज्ञो वरिमन् (वरिमणि) ग्रा पृथिव्याः, v. 3, No. 17; see note thereon.

Vedic Conjugation.

29. In the Vedas, लुङ् (aor.), लङ् (imperf.) and लिट् (perf.) are used for all tenses, *e.g.*, चित्तं देवानामुदगात् (लुङ् for लट्), v. 1, No. 11; देवो देवेभिरागमत् (aor. for imp. गच्छतु), v. 5, No. 1; ग्रथा ममार (perf. for pres. म्रियते); ग्रग्निमथ्नीतारमग्रथीत (लङ् for लट्).

30. In class. Skt., augs. अट् and आट्[29] are elided in लुङ् and लङ्, when the particle मा is employed, but not necessarily so in the Vedas. Aug. अट् or आट् is added even with मा, and sometimes not added even when there is no मा *e.g.*, तचन् (for ग्रतचन्) रथं सुदृतम्, v. 1, No. 13; विष्णोर्नु कं वीर्याणि प्र वोचम् (for ग्रवोचम्, imperf. for pres., *vide* rule 29 above), v. 1, No. 6; similarly महीं मायां वरुणस्य प्र वोचम्, v. 5, No. 14.

31. In pres. tense (लट्) 1 pers. pl. term. मस् becomes मसि, *e.g.*, नमो भरन्त एमसि (ग्रा इमः), v. 7, No. 1; स्तोतारस्त इह स्मसि (स्मः), v. 9, No. 16; similarly त्वमस्माकं तव स्मसि, viii. 92. 32; तं त्वा वर्धयामसि (वर्धयामः), vi. 16. 11; ग्रश्नोमसि, v. 8, No. 19; चरामसि, v. 5, No. 20.

32. In Ātmanepada त of the terminations—ते, ाते, न्ते (pres. 3), त and न्त (imperf. 3 sg. and pl.), etc. is elided, *e.g.*, दक्षिणतः श्रये (for श्रयते); श्रेरे (for श्रेरते) यैऽस्य सर्वे पाप्मानः, Ait. Br., para. III, v. 2, p. 81; देवा ग्रदुह्र (ग्रदुहत, imperf. 3. pl. तस्मिन्ने रुडागमः by Pāṇ. vii. 1. 8); similarly धेनवो दुह्रे (pres. 3. pl.).

33. त (imp. 2. pl. term.) is substituted for by तात्, *e.g.*, गावमस्यानूनं क्रणुतात् (क्रणुत); मूर्धं चक्षुर्गमयतात् (गमयत), पार्श्वे खनतात् (खनत), Ait. Br. 2.6.15,16.

(*a*) Sometimes त (imp. 2. pl. term.) is replaced by तप्, तनप्, तन and थन; तप् is पित्, and not ङित् (*vide* the maxim ग्रपित् सार्वधातुकं ङित्-संज्ञं स्यात्). In the

* Peculiarity of अरि (masc.) lies in its gen. sg. form which is sometimes अर्यः instead of अरेः, v. 4, No. 3; रायि (fem.) is declined like रायो except in nom. pl. (ग्रस्), Pāṇ., iv. 1. 31., *e.g.*, रायो वासस्पतये सिमस्मै, v. 4, No. 11; न रायो ग्रङ्ग ग्रामोत् प्रकेतः, v. 2, No. 30; neu. stem in उ takes forms like मध्वः, v. 5, No. 6, वस्वः, पित्वः (of the stem पितु- mg. food), v. 3, No. 25.

[29] छन्दसि लुङ्-लङ्-लिटः, Pāṇ. iii. 4. 6.

[30] बहुलं छन्दस्यमाङ्योगेऽपि, vi. 4. 75. *आट् has the occasion of being added to by the rule of Pāṇ. vi.4. 73, *e.g.*, ग्रानट् (√नश्+लुङ् त), ग्रावः (√इ+लुङ् त).

[31] इदन्तो मसि, vii. 1. 46.

[32] लोपस ग्रात्मनेपदेषु, ii. 1. 14.

[33] तस्य तात्, vii. 1. 44.

[33a] तप्-तनप्-तन-थनाः, vii. 1. 45.

case of तप्-substitution, the rt. gets guṇa and the last vowel is not prolonged (by Pāṇ. vi. 3. 133), *e.g.*, शशोच (for शशुच) यावाग: ; यमाय घृतवद्धविर्जुहोत, v. 14, No. 24.

In the case of non-substitution of तप् (*i.e.*, when त remains in its own form), it is treated as ङित् being ऋपित्, so no guṇa takes place, and the final vowel is prolonged, *e.g.*, यमाय जुह्वता हवि:, v. 13, No. 24. तन—ता न ऊर्जं दधातन (for धत्त), v. 1, No. 21. तनप्—सुनोतन (for सुनुत, तनप् is not ङित, being पित्, so guṇa), v. 34.1.

34. हि (imp. 2. sg. term.) becomes धि after स्रु, शशु, पृ, कृ and इ, *e.g.*, सुधी (for prolongation of vowel, see rule 23 above), गिर:, v. 1, No. 2; शशृधि गिर:, viii. 84.3, etc.

(*a*) In other places also हि is so substituted, as in रारन्धि, युयोधि, *cf.* विश्वा अभीती रपसो युयोधि, v. 3, No. 19.

Other peculiarities in Conjugation.

35. (*a*) The rt. मी gets its long vowel shortened before ग्-इत् affixes (generally लट्, लोट्, लङ्, विधिलिङ्, शत्, etc.), *e.g.*, मी अर्य: पुष्टीरिञ्ज इषामिनाति, v. 5. No. 3.

(*b*) rts. हृ and गृह् get their ह changed into भ, *e.g.*, गृह्—गृभाय जिह्वया मधु, viii. 17.5; गृभ्णामि ते सौभगत्वाय हस्तम, x. 85. 36; हृ—मध्वा कर्तोर्भितं सं जभार, v. 4, No. 11.

Vedic Subjunctive : (लेट्)

36. लेट् is a peculiar tense in the Vedas, unknown in class. Skt. It is the Vedic Subjunctive, as it is employed in conditional sentences. The syntactical use of लेट् is twofold : (A) It appears in principal sentences :—(*i*) in most cases with interrogatives, *e.g.*, किम् नु व: कृणवाम, what, pray, shall we do for you? ii. 29. 3; कदा चनयिर्यं नरम् आ वरुणं करामहे when shall we bring hither Varuṇa, the lord of the universe? i. 25.5; (*ii*) in negative sentences with न (not), *e.g.*, न ता नशन्ति न दभाति तस्कर:, they perish not, no thief shall harm them, vi. 28. 3. (B) In dependent clauses, *e.g.*, नेत जिह्मायन्यो नरकं पताम, lest we, pursuing crooked ways, should fall into hell, RV. Khila, x. 106.1 (Nir. 1.11).

Conjugational terms. of लेट् are the same as those of लट् :—(parasm.) तिप्, तम्, अन्ति, etc.; (ātman.) ,ते, आते, अन्ते, etc. For the conjugation of लेट्, the following rules are to be noted :

(*a*) लेट् is used in the Vedas in the potential sense.

34 स्रु-शशु-पृ-कृ-इभ्यश्च छन्दसि, Pāṇ. vi. 4. 102.

34a अडितश्च, vi. 4. 103.

35a सीनातेर्निगमे, vii. 3. 81.

35b इयङ्डीभ्यश्छन्दसि, Vārtt.

36a लिङर्थे लेट्, Pāṇ. iii. 4. 7; senses of लिङ् are—विधि (command), निमन्त्रण (entreaty), आमन्त्रण (entreaty), अधीष्ट (good advice), संप्रश्न (courteous enquiry) and प्रार्थना (prayer).

(*b*) In parasm. इ of conjugational terms. is optionally elided.

(*c*) Augs. अट् (अ or आट् (आ) come after the rt. and before the conju. terms.

(*d*) सिप् (स्) sometimes comes between them.

For example, with अट् added to the rt. and elision of इ—करत्; with आट् and non-elision of इ—चरति, *cf.* शैते निषद्यमानस्य चरति चरतो भगः, Ait. Br.: gāthā 3, para. III, p. 81; यमं पश्यसि वरुणञ्च दैवम्, v. 7, No. 24; विभरसि, अभ्यवहारसि, Br. No. 2, para. 3, p. 83. पतति विद्युत्; with सिप्, अट् and elision of इ—तारिषत्, *cf.* प्रत्न आयुषि तारिषत् (in this example Vṛddhi has taken place, because सिप् is treated as ङित्).

(*e*) न् of the 1 pers. terms. (वस्, मस्) is optionally elided, *e.g.*, करवाव for करवावः; करवाम for करवामः, *cf.* नरक पताम in the example quoted above from Nir. 1. 11, under rule 36, p. 409.

(*f*) ऐ is the substitute of आ of the conju. terms. आते (3. du.) and आथे (2. du.), *e.g.*, सुवेजसा मादयैते, iv. 41. 3.

(*g*) ऐ is optionally the substitute of ए (of ātman. conju. terms.) except of आते and आथे (of the preceding rule 36[f]) सह वीर्यं करवावहै (ए of वहै is changed into ऐ); अतर्वै (1. sg.) Br. No. 2. para. 3, p. 83; उपासामै (2. sg.), अपद्यामै (*1. sg.*), *ibid.*, para. 4; अहमेव पयूनामीशे (1. sg).

Vedic Infinitive.

37. Infinitive in the Vedas presents a variety of forms with terms. सै, असे, अध्यै, तवै, तवै, etc., *e.g.*, सै—जिषे (जेतुम्); v. 2, No. 13; असे—जीवसे (जीवितुम्), v. 14, No. 24; अध्यै—गमध्यै (गन्तुम्), v. 6, No. 6; तवै—सर्तवै (सर्तुम्), v. 12. No. 3; पातवै (पातुम्), v. 1, No. 20; तवै—एतवै (एतुम्), v. 10, No. 24; अवभर्तवै (अवहर्तुम्; ह of ह=भ by इषहोर्भश्छन्दसि, rule 35*b* above), v. 2, No. 24; इलवै (इलतुम्), v. 6, No. 28; दातवै, iv. 21. 9.

38. In inf. द्रशे and विख्ये stand resp. for द्रष्टुम् and विख्यातुम्, *cf.* आपः पृणीत ··· ज्योक् च सूर्यं द्रशे, v. 7, No. 21.

Nominal verbs (नामधातु) *in the Vedas.*

39. In the Vedas, prolongation, or substitution of ई for the final vowel of the noun before aff. क्यच्, does not take place, except in the case of पुत्र and

---

[36] इतश्च लोपः परस्मैपदेषु, iii. 4. 97.

[36a] सिब्बहुलं लेटि, iii. 1. 34. ङिद्वचनम्.

[36b] आत ऐ, iii. 4. 95.

[37] तुमर्थे से-सेन्···, iii. 4. 9.

[38] छन्दस्युभयथा, vii. 4. 35, also the Vārtt. rule अपृक्तादीनामिति वाच्यम्.

[38a] लिटोऽडाटौ, iii. 4. 34.

[38c] स उत्तमस्य, iii. 4. 98.

[38d] वैतोऽन्यत्र, iii. 4. 99.

[39] द्रशे विख्ये च, iii. 4. 11.

a few other nouns, *e.g.*, मित्रयु:; in the case of पुत्र. *cf.* पुत्रीयन्त: सुदानव: (here ई substitution takes place), vii. 96. 4; so also जनीयन्त: ।

40. अश्व and अघ have their final vowels replaced by आ before क्यच्, *e.g.*, अश्वायन्तो मघवन्, vii. 32. 23; अघायु:, i. 120. 7, 27. Except of these two words (अश्व and अघ), the final vowels of other words are never prolonged.

41. उ is added after क्यच् in the Vedas, *e.g.*, अघायु:, अश्वायु:, वाजयु:, गव्यु:, हिरण्ययु:, v. 3, No. 4; दैव्ययव:, v. 5, No. 6; अम्बयु, v. 4, No. 10; अवस्यवे, v. 6, No. 2.

42. In class. Skt. क्यच् is added to denote *a wish for one's own self*, but in the Vedas it sometimes denotes a *wish for others*.

43. The suffix क्काच् has a variety of forms in the Vedas :—

(*a*) Aug. य is added at the end, *e.g.*, हिंकाराय त्वा पुनरस्मेहि (हिंकाराय=हिंकृत्य), v. 8, No. 24, see note thereon; हूयते, v. 11, No. 20; दिवं सुपर्णो गत्वाय (गत्वा), viii. 100. 8; दत्त्वाय (दत्त्वा), x. 85. 33.

(*b*) Some other irregular forms of क्काच्: दृष्टीनम् (दृष्ट्वा), पित्वीनम्, पीत्वी (पीत्वा), *cf.* पीत्वी, viii. 76. 10; x. 55. 8;—112. 1; पीत्वी सोमस्य वावृधे, iii. 4. 7; खात्वी, खिद्र: खात्वी मलादिव.

44. Suffix क्त and its irregular forms :—

(*a*) नसत्त (fr. नस्+ √सद्+क्त, class. Skt. नसन्न) ; नियत्त (class. नियन्त). *cf.* ये पार्थिवे रजसि या नियत्ता, v. 2, No. 25. अनुत्त (fr. नञ्+ √उन्द्, class. अनुन्न, अनुत्त). *cf.* अनुत्तमनुभ्रम्, v. 12, No. 4; see note thereon; प्रतूर्त (fr. प्र √त्वर or तूर्, class. प्रत्वरित or प्रतूर्ण); सूर्त (fr. √सृ, class. सृत); गूर्त (fr. √गृ, class. गृर्ण) ।

(*b*) यसित (class. यस्त), स्कभित (√स्कन्भ्, class. स्कब्ध), सभित (√स्तन्भ्, class. स्तब्ध), उत्तभित, चत्त (√चत्, *to beg*, class. चतित), *cf.* चैत्त, चत्ता, x. 155. 2; i. 132. 6), विकस्त (√कस्, class. विकसित), *cf.* विधे ह श्यावमश्विना विकस्तम्, i. 117. 24.

45. Suffix क्त्च् and its irregular forms :—विशस्तृ (class. विशसितृ, वि+ √शस), *cf.* note on विशसितारं न विविद्व:, Ait. Br., para. IV, p. 375, शंस्तृ (√शंस्, *to praise*, class. शंसित), *cf.* उत शंस्ता सुविप्र:, i. 162. 6; शास्तृ (√शास्, class. शासित). *cf.* प्रशास्ता पोता, i. 94. 6; तरुत्र, तरुत्र (√तॄ, class. तरित्र, तरीत्र). *cf.* तरुतारं रथानाम्, x. 178. 1; वरुत्र, वरुत्र (√वृ), fem. forms वरुत्री, वरुत्री (class. वरित्री, वरीत्री) are often found, *cf.* वरुत्रीभि: सुशरणो नो अस्तु, vii. 34. 22.

40 अश्वाघस्यात्, vii. 4. 37.

41 क्याच्छन्दसि, iii. 2. 170.

42 छन्दसि परेच्छायामपि क्यच् वक्तव्य: ।

43a छन्दीनमिति च, vii. 1. 48; खात्यादयश्च, vii. 1. 49.

43b क्वो यक्, vii. 1. 47.

44a नसत्त-नियत्तानुत्त-प्रतूर्त-सूर्त-गूर्तानि छन्दसि, viii. 2. 61.

44b प्रसित-स्कभित-स्तभितो-वित्तभितचत्त-विकस्ता:, vii. 2. 34.

Vedic Irregularities in General.

46. As the Vedas were prevalent before the Grammar was written by Pāṇini, irregular uses of diverse character, of words, declensions, conjugations and the like, not conforming to the gram. rules, are frequently met with. All these come under *Vyatyaya*, which means transgression of the fixed rules.

(*i*) Irregular conju. :—पर्वता भयन्ते (for बिभ्यति), √भी of cl. 3 conjugated like cl. 1, v. 1, No. 3; अभि पाथो अश्याम् (for अश्नुयाम्), √अश् of cl. 5 conjugated like cl. 1, v. 5, No. 6; वइत्व (for वर्तस्व), √वृत् of cl. 1 conjugated like cl. 3, v. 3, No. 7. For more examples *cf.* आण्डा शयस्य भेदति (for भिनत्ति), viii. 40. 11; ऋसा मरते पति (for म्रियते), x. 86. 11. Similarly *cf.* अक्तभायत्, v. 1, No. 6, where √स्कभ of cl. 9. takes शायच्, Pāṇ. iii. 1. 84. √कृ is more commonly used in cl. 5 in the RV. than in cl. 8 to which it naturally belongs; only in three places in Maṇḍala X, it is used in cl. 8; *cf.* कृणते, v. 3, No. 15, see note thereon; कृणोमि, v. 5, No. 28; कृणोति, v. 8, No. 29.

(*ii*) Irregular case-affixes :—धुरि दक्षिणाया: (gen. for loc. दक्षिणस्याम्); एना पृथिव्या for अस्या: पृथिव्या:; एताम् (for एतस्याम्), Ait. Br., para. I, v. 8, p. 370.

(*iii*) Irreg. conju. terms. :—ये तक्षति (for तक्षन्ति), i. 126. 6.

(*iv*) Irreg. Parasm. for Ātman. (उपयड) ब्रह्मचारिणमिच्छते (for इच्छति), *vice versa* युध्यति for युध्यते .

(*v*) Irreg. genders :—मधो: for मधुन:, मधोमूध्न: इवासते .

(*vi*) Irreg. tenses—इविषा विधेम for विधाम: (√विध, *to propitiate, to worship*), vv. 1-9, No. 27, and so on.

---

[46] व्यत्ययो बहुलम्, Pāṇ. iii. 1. 85; also read in this connection the Kārikā :—

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्-स्वर-कर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥

RULES FOR PADAPĀṬHA.

1. अवग्रह (ऽ) stands between (*i*) two components of a compound, (*ii*) between upasarga and the verb, (*iii*) between noun and तद्धित affix, *e.g.*, (*i*) इन्द्रंश्राय—इन्द्रिऽश्राय, v. 1, No. 4; रथऽधातमम्, v. 1. No. 1, पिताऽइव, v. 9, No. 1; महऽसुपात्, v. 1, No. 26; (*ii*) अभिऽचियन्ति, v. 2, No. 6, उत्ऽधाजत्, v. 3, No. 3; अतिऽरोहति, v. 2, No. 26; (*iii*) सुनृताऽवते, v. 2, No. 10; हिमऽवन्तः, महिऽत्वा, v. 4, No. 27. It is, however, to be noted that when a *tad. aff.* follows a compd., अवग्रह often stands between the components of the compd., and not between the compd. and the *tad. aff.*, *cf*, रथऽधातमम्, above; (*iv*) between the stem and भिः (instr. pl. term.)—but not in the form एभिः in which case अवग्रह does not occur, *e.g.*, पितृऽभिः, v. 2, No. 1, मरुत्ऽभिः, vv. 1-9, No. 12; but not in पूर्वेभिः above; सोमेभिः, v. 5, No. 19.

2. The word इति follows the words technically called प्रगृह्य (*e.g.*, words ending in ई, ऊ, ए in dual, etc., *vide* Pāṇ., i. 1. 11-18):—छन्दसी इति, v. 8, No. 3; इवेते इति, *ibid*. In the case of compounds in dual ई, ऊ and ए, see note on संयती and विह्वयेते, v. 8, No. 3. Indec ओ of the Saṃhitā is read ओ३ इति in pada-pāṭha, (Pāṇ. i. 1, 17, 18), v. 10, No. 15; v. 2, No. 24. Also after aff. शे (substitute for case term. by Pāṇ., vii. 1. 39, सुपां सुलुक्°) इति comes, Pāṇ. i. 1. 13; *e.g.*, ते इति, v. 5, No. 4; v. 5, No. 20; so also after final ओ of indec., *e.g.*, नो इति, v. 3, No. 16; अथो इति, v. 5, No. 26.

3. When a word ending in a visarga representing र् occurs at the end of a pāda or a hemistich, इति follows in the padapāṭha and again the word is repeated in its usual form. *e.g.*, वनेरिति वनेः, v. 1, No. 2; चकरित्यकः, v. 4, No. 3; v. 9, No. 17; but not so in v. 10, No. 15, where चक्रः occurs in the beginning of pāda 2.

4. As for voc. ओ of the stems in उ, see note on इन्दो इति, v. 5, No. 20; and for voc. compds. in ओ see note on वज्रबाहो, v. 3, No. 19.

APPENDIX II

CEREMONIAL APPLICATIONS

No. 1 : AGNI

i. 1

[अग्निमीळे इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्]

विनियोगः कर्मभिः सम्बन्धः । स च द्विविधः—सामान्येन विशेषतश्च । संहितात्वेन विनियोग आद्यः । अन्तिमश्च सूक्तविनियोगः, द्वृचादिविनियोगः, ऋचो विनियोग इति त्रिविधः । तत्रायं सूक्तविनियोगः । इदं सूक्तं सोमयागे यस्मिन्दिने सोमस्य रसं निष्कास्य होमः क्रियते तस्मात्सुत्यादिनात्पूर्वस्या रात्रेरुत्तरार्द्धे पक्षिणामारावतः पूर्वं मन्त्रैः क्रियमाणा स्तुतिः प्रातरनुवाकः, तत्र विनियुज्यते । प्रातरनुवाके अग्निः, उषाः, अश्विनौ चेति तिस्रो देवताः स्तूयन्ते । प्रतिदेवतं च गायत्र्यादिसप्तच्छन्दोयुक्ता अनेके मन्त्राः पठनीया भवन्ति । स चायं प्रतिदेवतं स्तवः क्रतुशब्देनोच्यते । एवञ्चाग्नेः स्तव आग्नेयः क्रतुः, उषसः स्तव उषस्यः क्रतुः, अश्विनोः स्तव आश्विनः क्रतुरिति भवति । तत्राग्नेये क्रतौ गायत्रीच्छन्दोयुक्तमन्त्रपाठप्रसङ्गे अग्निमीळे इति सूक्तं वक्तव्यमित्यर्थः । (आ श्रौ अ. ४. ख. १३)

[तस्मिन्सूक्ते प्रथमाया इत्यादि]

अत्र सूक्ते प्रथमा अग्निमीळे इत्येषा ऋक् पवमानेष्टौ विनियुज्यते । श्रुतौ उच्यमानानां दर्शपूर्णमासादीनां कर्मणामनुष्ठाने त्रयोऽग्नयोऽपेक्ष्यन्ते—आहवनीयो गार्हपत्यो दक्षिणाग्निश्चेतिनामकाः । ते चाग्नयोऽरणिमन्थनेन निष्पाद्यन्ते वैदिक्या प्रक्रियया समन्त्रम् । अरणिशब्देन मन्थनोपयोगि आश्वत्थकाष्ठं शमीकाष्ठं चोच्यते । तदिदमग्निनिष्पादनमाधानशब्देनोच्यते । आधानस्य पूर्णाहुत्या समाप्तिः, होमेन समाप्तिः, इष्ट्या वा समाप्तिरिति पक्षत्रयम् । तत्रान्तिमे पक्षे तिस्र इष्टयोऽनुष्ठीयन्ते, याः पवमानेष्टिशब्देनोच्यन्ते याज्ञिकैः । तत्र द्वितीयेष्टौ स्विष्टकृन्नामककर्मविशेषानुष्ठाने सूक्तगता प्रथमा अग्निमीळ इत्येषा ऋक् याज्यात्वेन विनियुज्यते । यागे प्रधानदेवतोद्देशेन हविषः प्रदानात्परम् य उपयुक्तहविःशेषेणाग्न्युद्देशेन क्रियमाणो यागविशेषः स स्विष्टकृच्छब्देनोच्यते । हविषः प्रदानावसरे पठ्यमानो मन्त्रो याज्येत्युच्यते । एवं चोक्तद्वितीयपवमानेष्टौ स्विष्टकृद्यागे हविषो दानावसरे पठनीयेयमृग् इत्यर्थः । (आ० श्रौ० अ ८. ख. १)

[अभिप्लवषडहे इत्यादि] v. 4, p. 107.

सोमवल्ल्या रसं निष्कास्य तेन यावद्भिर्दिनैर्यागा अनुष्ठीयन्ते तावद्भिर्दिनैस्ते सोमयागा उच्यन्ते । यथा एकेन दिनेनानुष्ठाने एकाहः, द्वाभ्यां दिनाभ्यां अहः, त्रिभिर्दिनैस्त्र्यह इत्यादि ।

एवं षड्भिर्दिनैर्योऽनुष्ठीयते सोमेन यागः स षडह इत्युच्यते। तस्य च षडहसोमयागस्यानुष्ठान-प्रकारभेदेन द्विविधत्वम्—एकोऽभिप्लवः षडहो द्वितीयः पृष्ठ्यः षडह इति भेदतः। अभिप्लव-षडहे च प्रथमदिवसे अग्निष्टोमनामकसोमयागवदनुष्ठानम्, षष्ठे दिवसे च। द्वितीयतृतीय-चतुर्थपञ्चमेष्वहस्सु उक्थ्यनामकसोमयागवदनुष्ठानं भवति। सोमयागसामान्ये च त्रिः सोमस्य सवनं भवति प्रतिसवनं निष्कासितेन रसेनानुष्ठीयमानयागा अपि सवनान्तःपातित्वेन मन्यन्ते। प्रतियागं हवनार्थं ग्रहनामकपात्रविशेषे रसं गृहीत्वा वेद्यामवस्थाप्य तत्पात्रं ततः स्तोत्रशस्त्राणि प्रपठ्यान्तिमे मन्त्रे पठिते सति तस्य रसस्य कञ्चनांशो हूयतेऽग्नावशिष्टश्च होत्रादिभिः सर्वैर्ऋत्विग्भिः पीयत इति क्रमः। तत्र स्तोत्रं नाम सामसञ्ज्ञकगानयुतमन्त्रपाठेन स्तुतिः। शस्त्रं नाम केवलाः पठ्यमाना मन्त्रास्तैः सम्पाद्यमाना स्तुतिः। अन्ते पठ्यमानश्च मन्त्रः शस्त्रयाज्या याज्येति चोच्यते। तत्र स्तोत्राणि उद्गात्रादिभिर्ऋत्विग्भिः स्तूयन्ते। शस्त्राणि च होत्रा, मैत्रावरुणेन, ब्राह्मणाच्छंसिना, अच्छावाकेन च शस्यन्ते। तत्र होतुः प्रतिसवनं शस्त्रद्वयं भवति। तदितरेषां च मैत्रावरुणादीनां प्रातःसवने तृतीयसवने चैकैकं शस्त्रं भवति। एवञ्चाग्निष्टोमे प्रथमे सोमयागे होतुः षट् शस्त्राणि होत्रकाणां मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां सवनद्वये षट् शस्त्राणीति मिलित्वा द्वादश शस्त्राणि भवन्ति। तानि यथायथं प्रपठ्य तदधिकानि त्रीणि शस्त्राणि उक्थ्यनामके सोमयागे पठनीयानि भवन्ति। एवं चोक्थ्ये सांकल्येन पञ्चदश शस्त्राणि भवन्ति। यदा पुनरनेकैर्दिनैरनुष्ठेया भवन्ति सोमयागास्तदानीमभिप्लवादिषु यागेषु मैत्रावरुणादिभिर्ऋत्विग्भिः स्वीयशस्त्रशंसनावसरे तद्दिवसीये उद्गातॄणां स्तोत्रे सामगानार्थं यस्तृच उपात्तस्तस्य शंसनं कर्तव्यं भवति। स चायं तृचः स्तोत्रियशब्देनोच्यते। ततः परस्मिन्दिने यस्मिंस्तृचे उद्गातृभिर्गानं करिष्यते तस्य तृचस्य पूर्व-स्मिन्दिने स्तोत्रियशंसनोत्तरं शंसनं कर्तव्यं भवति। तस्य चास्य परदिनीयसामस्तोत्रियस्य तृचस्य पूर्वस्मिन् दिनेऽनुरूपशब्देन व्यवहारः क्रियते याज्ञिकैः। तदुक्तं ब्राह्मणे "यः श्वः स्तोत्रिय-स्तमनुरूपं कुर्वन्ती"ति। एवं चात्र यागे मैत्रावरुणनामकेन ऋत्विजाऽनुरूपत्वेन वक्तव्यं तृचद्वयं वैकल्पिकमुक्तमाश्वलायनश्रौतसूत्रे। तत्राग्नेयमित्येकतरस्तृचः। तदेतत्सर्वमवधाय भाष्यकृतोक्तं "वैकल्पिकोऽनुरूपस्तृच" इति। (आ० श्रौ० अ. ७. ख. ८)

[अग्नीषोमप्रणयने इत्यादि] v. 1, p. 110.

सोमयागे वेदिद्वयं भवति एका प्राकृती द्वितीया उत्तराख्या। तत्र पश्चिमायां दिशि यजमानस्योच्चताप्रमाणेन निर्मितः पूर्वपश्चिमप्रलम्बः दक्षिणोत्तरव्यायतो मण्डपः प्राचीनवंशमण्डप इत्युच्यते। तत्र मण्डपे प्राकृती वेदिर्भवति। वेदिर्नाम आहवनीयगार्हपत्यनामकाग्निद्वय-स्थानमध्यवर्तिनी भूमिः। श्रौतकर्मणां यत्रानुष्ठानं भवति साग्निहोत्रशाला। तस्यां शालायां प्राच्यां दिशि चतुष्कोणेऽग्निस्थाने निहितोऽग्निराहवनीयः। पश्चिमायां च वर्तुलेऽग्निस्थाने निहितोऽग्निर्गार्हपत्यः। तत्रोक्तायां वेद्यां सोमयागे दीक्षणीयेष्टेरनन्तरं सोमं क्रीत्वावस्थापयन्ति। तत आतिथ्येष्टेरनन्तरं स सोम उत्तरस्यां वेद्यां हविर्धानमण्डपे नेयः, एवं तत्र वेद्यामवस्थितस्याह-

वनीयाख्याग्नेरपि कञ्चनांश उत्तरवेद्यां नेयः। तयोश्चानयोरग्नीषोमयोः सह प्रणयनं क्रियते तदिदमग्नीषोमप्रणयनम्। तत्रानेके मन्त्राः पाठ्यास्तन्मध्ये 'उप त्वाग्न' इत्यादिस्तृचः पठनीयो भवति। तदुक्तं भाष्यकृता। (आ० श्रौ० अ. ४. ख. १०)

No. 2 : AGNI

ii. 6.

v. 1, p. 112.

[प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसि इत्यादि] v. 1, p. 112.

प्रातरनुवाकः पूर्वमुक्तः। सोमस्य सप्त संस्था भवन्ति। संस्थानामानुष्ठानप्रकारविशेषः। ताश्च अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्याम इति सप्त। तत्रातिरात्रसंस्थायामग्निष्टोमोक्थ्यषोडशिसंस्थानां दिनेऽनुष्ठानं कृत्वा रात्रौ पर्यायत्रयानुष्ठानं करणीयं भवति। प्रतिपर्यायं च शस्त्रचतुष्टयवचनं भवति। त्रयाणां पर्यायाणां समाप्तावाश्विनं शस्त्रं शंसनीयं भवति। तस्मिन्नाश्विनशस्त्रेऽपि प्रातरनुवाकवदेवाग्नप्रादयस्तिस्रो देवताः स्तूयन्ते। प्रातरनुवाकतो विशेषस्त्वसावेव यदत्र सहस्रं ततोऽधिका वा मन्त्रा आसूर्योदयं वक्तव्या भवन्ति। प्रातरनुवाके च सार्द्धद्विशतपर्यन्ताः मन्त्राः पठ्यन्ते पक्ष्यारावतः पूर्वमेव समापनीयो भवति प्रातरनुवाकः। तदुक्तमाश्वलायनेन "प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावमर्मोदेतोः शंसेद्" इति। एवं च प्रातरनुवाके यद्यदुच्यते तत्सर्वमाश्विनेऽपि शस्त्रे शंसनीयं भवति इति इदं सूक्तमाग्नेये क्रतौ गायत्रे छन्दसि शंसनीयमिति। तदुक्तं भाष्यकृता। (आ० श्रौ० अ. ४. ख. १३)

[आपराह्णिक्यामुपसदि इत्यादि] v. 1 (contd.), p. 112.

सोमयागे दीक्षणीयेष्टेरनन्तरं प्रायणीयातिथ्ययोरनुष्ठानं कृत्वा दिनत्रयमुपसन्नामका यागा अनुष्ठीयन्ते। तेषां प्रतिदिनं द्विरनुष्ठानं भवति प्रातरपराह्णे चेति। प्रातरनुष्ठीयमानोपसत्पौर्वाह्णिकी उपसदित्युच्यते। अपराह्णीया च आपराह्णिकी। तत्रास्यामापराह्णिक्यामुपसदि "इमां मे" इत्याद्यास्तिस्र ऋचस्त्रिरावर्त्य नवत्वं सम्पाद्य सामिधेनीत्वेनोपयुज्यन्ते। सामिधेन्यो नाम अग्नेः समेधनावसरे पठ्यमाना ऋचः। (आ° श्रौ° अ. ४. ख. ८)

No. 3 : INDRA

ii. 12.

[संसवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद्यो जात एवेति शंसेत्।] v. 1, p. 121.

परस्परसमीपवर्तिनि परस्परमन्त्रध्वनिश्रवणयोग्ये देशे विभिन्नविभिन्नयजमानैर्युगपत्सोमयागानुष्ठाने संसवो दोषः। तत्र प्रथमं येन सोमयागप्रारम्भः कृतस्तस्य न दोषः परत्वात्प्रारम्भकर्तुरेव स दोषः। सोऽपि गिर्यादिव्यवधाने न भवतीत्यादि ब्राह्मणे विस्तरश उच्यते। तत्र संसव-

दोपस्थलेऽनुष्ठीयमानसोमयागे मध्यन्दिनसवने निष्केवल्यशस्त्रे निविदां शंसनोपयोगिसूक्तः पूर्वं यो जात एवेति सूक्तं शंसनीयम्। (आ° श्रौ° अ. ६. ख. ६)

[अभिप्लविके तृतीयेऽहनि निष्केवल्ये यो जात एवेति निविद्धानीयम्।] v. 1 (contd.)

अभिप्लवषडहः पूर्वमुक्तस्तत्र तृतीयेऽहनि निष्केवल्यशस्त्रे इदमेव सूक्तं निविद्धानीयं भवति। निविदो नाम निविदध्याये पठ्यमाना मन्त्राः। तेषां यज्ञे शस्त्रपाठावसरे सूक्तमध्ये शंसनं कर्तव्यं भवति। यस्मिंश्च सूक्ते एते निवित्पञ्जका मन्त्राः पठ्यन्ते तत्सूक्तं निविद्धानीयशब्देनोच्यते। (आ° श्रौ° अ. ७. ख. ७)

[विश्वजिति माध्यन्दिने सवने मैत्रावरुणः स्वशस्त्रे प्राकृतात्सूक्तात्पूर्वं यो जात एवेति सामसूक्तं शंसेत्] v. 1 (contd.)

गवामयनादिसांवत्सरिके सत्रे संवत्सरमध्यवर्तिविषुवन्नामकदिनोत्तरं स्वरसामनामकं यागत्रयं दिनत्रये अनुष्ठाय चतुर्थे दिवसेऽनुष्ठीयमानो यागो विश्वजिदाख्यः। तस्मिन्यागे माध्यन्दिने सवने मैत्रावरुणः स्वीयशस्त्रशंसनावसरे प्रकृतिसम्बन्धिसूक्ततः पूर्वं यो जात एवेति सामसूक्तं शंसेत्। (आ° श्रौ° अ. ८. ख. ७)

[अग्निष्टुन्निष्केवल्ये निविद्धानीयम्] v. 1 (contd.)

दुष्कीर्त्या युक्तः पापरोगेण वा ग्रस्तः, समर्थोऽपि योऽनपत्यः, तादृशेन यजमानेनोक्तदोष-निरासायाग्निष्टुन्नामकेन सोमयागेन यष्टव्यम्। तत्र मध्यन्दिनसवने निष्केवल्ये एतत्सूक्तं निविद्धानीयमित्याश्वलायनेनोक्तम्। (आ° श्रौ° अ. ९. ख. ७)

[महाव्रते निष्केवल्ये यो जात एवेति सूक्तम्] v. 1 (contd.)

सत्र उपान्तिमः सोमयागविशेषो महाव्रतशब्देनोच्यते। तत्र सामान्ययागापेक्षया अनेके विशेषा एतरेयारण्यके प्रतिपाद्यन्ते सोमयागत्वादत्र निष्केवल्यं शस्त्रं शंसनीयं तत्र यो जात एवेति सूक्तं शंसेदित्यर्थः। (ए° आ° ३)

No. 4: INDRA

vii. 31.

[सूक्तविनियोगो लैङ्गिकः] v. 1, p. 137.

विनियोगो नाम कर्मभिः सम्बन्ध इति पूर्वमुक्तम्। तत्र कस्य केन कर्मणा विनियोगः कर्तव्येत्येतद्विषये मीमांसकैः षट् प्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि उक्तानि। एषां पूर्वापेक्षया परपरवर्तिनां दौर्बल्यम्। पूर्वप्रमाणाभावे परेण प्रमाणेन पूर्वप्रमाणकल्पनाद्वारेण विनियोगबोधनम्। तत्र साक्षात्सम्बन्धबोधकः शब्दः श्रुतिरित्युच्यते। तस्याभावेन प्रकृते

सूक्तस्य सूक्तत्वेन विनियोगे द्वितीयं लिङ्गरूपं प्रमाणमादेयम्। लिङ्गं नाम शब्दनिष्ठमर्थनिष्ठं च सामर्थ्यम्। तवैतेन सूक्तेदं कर्म कर्तव्यमिति-बोधकशब्दाभावेन सूक्तगतशब्दसामर्थ्यवशतो यमर्थं प्रतिपादयति सूक्तं तस्मिन्नर्थेऽस्य सूक्तस्य विनियोग इति श्रुतिकल्पनाद्वारेण विनियोगो मन्तव्यः। स चायौ लैङ्गिको विनियोग इत्युच्यते। लिङ्गप्रमाणाधीनो विनियोगो लैङ्गिक इति तस्यार्थः।

[प्रथमे रात्रिपर्याये मैत्रावरुणशस्त्रे प्र व इन्द्रायेति तिस्र ऋचः स्तोत्रियः] v. 1 (contd.)

अतिरात्रः सोमस्य संस्थाविशेष इति प्रागुक्तम्। तत्र षोडशिपर्यन्तं दिनेऽनुष्ठाय रात्रौ पर्यायेणानुष्ठेयमित्यपि पूर्वं प्रतिपादितमेव। तत्र एकैकस्मिन् पर्याये शस्त्रचतुष्टयं भवति। होतुरेकं शस्त्रं मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां चैकैकं शस्त्रमिति। एतेषां होत्रादीनां चमसाः प्रतिशस्त्रमुपयुज्यन्ते। तत्र होतुश्चमसस्य मुख्यत्वेऽपरेषां चमसानाममुख्यत्वदशायां यो गणः स प्रथमो गणः, एवं मैत्रावरुणचमसस्य मुख्यत्वे तदितरेषाममुख्यत्वे द्वितीयो गणः, एवम्ब्राह्मणाच्छंसिचमसस्य मुख्यत्वे तृतीयो गणः, अच्छावाकचमसस्य मुख्यत्वे च चतुर्थो गणः। एवं गणचतुष्टयेनानुष्ठानं प्रथमः पर्यायः, एवमेव द्वितीयः, तृतीयश्च पर्यायौ भवतः। तत्र प्रथमे रात्रिपर्याये मैत्रावरुणेन स्वीये शस्त्रे स्तोत्रियत्वेन प्र व इत्याद्यास्तिस्र ऋचो वक्तव्या इत्यर्थः। (आ° श्रौ° अ. ६. ख ४)

[अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे वयमिन्द्रेत्यनुरूपस्तृचः] v. 1 (contd.)

पूर्वोक्तातिरात्रस्य प्रथमपर्याये ब्राह्मणाच्छंसिना स्वीये शस्त्रे वयमिन्द्रेत्याद्यास्तिस्र ऋचोऽनुरूपत्वेन वक्तव्याः। तत्राहर्गणे भाविदिनगतः स्तोत्रियः पूर्वदिनेऽनुरूप इत्युक्तम्। एकाहे तु स्तोत्रियोत्तरमुच्यमानस्तृचोऽनुरूप इति आश्वलायनेनोक्तम्। तादृशोऽसावत्रानुरूप इत्यर्थः। (आ° श्रौ° अ. ६. ख ४)

[चतुर्थेऽहनि माध्यन्दिनसवने होत्रकशस्त्रे आरम्भगीयाभ्य ऊर्ध्वं वैराज एकस्तृच आवपनीयः, तदर्थाः प्र वो मह इत्याद्यास्तिस्र ऋचः] v. 1 (contd.)

षड्भिर्दिनैरनुष्ठीयमानः सोमयागः षडह इत्युक्तं प्राक्। तस्यापि षडहस्याभिप्लवपृष्ठ्यभेदेन द्विविधत्वमित्यपि पूर्वं प्रतिपादितम्। तत्र यस्मिन् षडहे प्रथमे दिने अग्निष्टोमः, चतुर्थे दिने षोडशी, द्वितीयतृतीययोः पञ्चमषष्ठयोश्च दिनेषु उक्थ्याया भवन्ति स पृष्ठ्यः षडह इत्युच्यते। तदेतस्मिन् पृष्ठ्यषडहे चतुर्थे दिवसेऽनुष्ठीयमानसोमयागस्य माध्यन्दिनसवने होत्रकैः स्वीयानि शस्त्राणि वक्तव्यानि। मैत्रावरुणब्राह्मणाच्छंस्यच्छावाका होत्रका इत्युच्यन्ते। तैर्मैत्रावरुणादिभिः स्वीये शस्त्रे शस्त्रप्रारम्भे प्रोच्यमानाः प्रारम्भगीया आरम्भगीया वा ऋचस्तासामुपरिष्टात विराट्छन्दस्कास्तिस्रस्तिस्र ऋचोऽधिका अत्र वक्तव्याः। अधिकवचनं चावापशब्देनोच्यते। ताश्च विराजः प्र वो मह इत्याद्या इत्याह। (आ° श्रौ° अ. ७. ख. ११)

No. 5: VIṢṆU

i. 22

verses 16-21.

[प्रातःसवने सोमातिरेके एकं शस्त्रं शंसनीयम्, तत्रातो देवा इत्याद्याः षड्चः] v. 16, p. 145.

सोमयागे प्रातरादि-त्रिषु सवनेषु प्रत्येकमनेके सोमेन यागा अनुष्ठीयन्ते तत्र प्रतिसवनं यावन्तो यागा अनुष्ठेयास्तावतां यागानामनुष्ठाने यावानपेक्षितः सोमरसस्तावानेव तत्र सवने बहीतो निष्कासनीयो न न्यूनो नाप्यधिकः। न्यूनत्वाधिक्ययोः प्रायश्चित्तीयता भवति। तत्र प्रातःसवने प्रातःसवनीययागानुष्ठानोपयोगिसोमरसापेक्षया यदि सोमोऽधिको बहीतः सुतः स्यात्तदा वैष्णवं शस्त्रं तत्राधिकं शंसनीयम्। तत्र च तस्याधिकस्य सोमरसस्योपयोगः कर्तव्यः। तस्मिन् प्रातःसवनीयवैष्णवशस्त्रेऽतो देवा इत्याद्याः षड् वैष्णव्य ऋचः शंसनीया इत्यर्थः। (आ° श्रौ° अ. ९. ख. ७)

[अक्षोर्यामेऽच्छावाकातिरिक्तोक्थेऽप्येताः षड्चः स्तोत्रियानुरूपार्थाः"।] v. 16 (contd.)

यस्याग्निहोत्रिणो यजमानस्य पशवो नोपधृता भवन्ति, अथवा तेषां देशान्तरे नयनेच्छा तदानीं तेन अक्षोर्यामनामिका सोमसंस्थानुष्ठेया। तत्राश्विनशस्त्रत ऊर्ध्वं होत्रादिभिरतिरिक्तानि उक्थानि वक्तव्यानि। तत्राच्छावाकेन यदा स्वमतिरिक्तमुक्थं शंसनीयं तदा तत्र अतो देवा इत्यादि-षट्सु ऋक्षु प्रथमास्तिस्रः स्तोत्रियत्वेनान्तिमास्तिस्रोऽनुरूपत्वेन वक्तव्या इत्यर्थः।

[दर्शपूर्णमासयोः प्रायश्चित्तहोमेऽप्याये विनियुक्ते।]

दर्शपूर्णमासयोर्होत्रा स्वीये होत्रे कर्मणि ज्ञाताज्ञातादिविध्यपराधानां समीकरणाय सर्वप्रायश्चित्तानि होतव्यानि। तत्र सर्वप्रायश्चित्तहोमेषु अतोदेवा इदं विष्णुरित्याभ्यामृग्भ्यां होमद्वयमनुष्ठेयं तत्रैते विनियुज्येते। (आ° श्रौ° अ. १. ख. ४)

[याज्यानुवाक्ययोर्मध्ये लौकिकभाषणे अतो देवाः इत्येषा जप्या।] v. 16 (contd.)

यज्ञे याज्यानुवाक्ययोर्मध्ये, तथा निगदानुवचनाभिष्टवशस्त्रजपानां च प्रारम्भत आसमाप्ति यज्ञोपयोगिविहितमन्त्रप्रयोगादिवाक्यजातं हित्वा वाक्यान्तरं किमपि न वक्तव्यम्। यदि किमपि वाक्यमुच्चार्येत लौकिकभाषणमिदम्। अगत्या तादृशभाषणकरणेऽतो देवा इत्येतस्य जपः कर्तव्यः प्रायश्चित्तरूपेण। तत्र हविषः प्रदानावसरे पठ्यमाना ऋक् याज्या, हविषो होमार्थं ग्रहणावसरे च पठ्यमाना ऋग् अनुवाक्येति पूर्वमुक्तम्। श्रवणमात्रेणार्थबोधका मन्त्रा निगदाः। यथा अग्नीदग्नीन्विहरेत्यादयः। प्रातरनुवाकादिका स्तुतिरनुवचनम्। प्रवर्ग्याख्ये सौमिककर्मणि पठ्यमानमन्त्रसमूहोऽभिष्टवः। एवमन्यत्रापि। गानरहितमन्त्रसाध्या स्तुतिः शस्त्रम्। उपांशु उच्चारणं मन्त्राणां जप इत्युच्यते। एतेष्वपि प्रारम्भादूर्ध्वं समाप्तिपर्यन्तं लौकिकभाषणं न कर्तव्यम्। आपत्त्या तत्करणे उक्तमन्त्रजपः प्रायश्चित्तम्। तदुक्तमाश्वलायनेन—"वाग्यमनमन्तरा च याज्यानुवाक्ये निगदानुवचनाभिष्टवनशस्त्रजपानां चारभ्यासमाप्तेरन्यद्यज्ञस्य साधनादापद्यतो देवा इति जपेदिति"। (आ° श्रौ° अ. १. ख. ५)

[वैष्णवोपांशुयाजस्येदं विष्णुरित्येषाऽनुवाक्या] v. 17, p. 146.

दर्शपूर्णमासयोः प्रधानभूताः षड् यागा अपरेऽङ्गयागाः। ते च षट्, आग्नेयोऽष्टाकपालः पुरोडाशयागः, उपांशुयाजः, अग्नीषोमीय एकादशकपालपुरोडाशयाग इति पूर्णमासे त्रयः प्रधानयागा अमावास्यायां तु आग्नेययागः पूर्णमासीवत्, उपांशुयाजः, ऐन्द्राग्न एकादशकपालपुरोडाशयाग इति प्रधानत्रयम्। अकृतसोमयागस्य यजमानस्य कृते उपर्युक्ताः षड्। कृतसोमयागस्य यजमानस्य कृते तु पौर्णमास्यामुपर्युक्ता एव यागाः, अमावास्यायां परम् आग्नेययागः, ऐन्द्रो दधियागः, ऐन्द्रः पयोयाग इति त्रयमिति विशेषः। तत्र कृतसोमयागपक्षे पौर्णमास्याम् अकृतसोमयागपक्षे पौर्णमास्यमावास्ययोः पुरोडाशयागद्वयमध्येऽनुष्ठीयमाने उपांशुयाजनामके यागे शाखाभेदेन त्रयो देवा विकल्पिताः—विष्णुः, प्रजापतिः, अग्नीषोमाविति। तदुक्तं ब्राह्मणे "विष्णुरुपांशु यष्टव्यः, प्रजापतिरुपांशु यष्टव्यः, अग्नीषोमावुपांशु यष्टव्याविति"त्यनेन। एवं यस्य देवस्योपांशुयाजे देवत्वेन ग्रहस्तदीये एव याज्यानुवाक्ये तत्र वक्तव्ये। तत्र यदा विष्णोरुपांशुयाजे देवत्वेन ग्रहस्तदानीमिदं विष्णुरित्येषा तस्य वैष्णवोपांशुयाजस्यानुवाक्येत्यर्थः। (आ° श्रौ° अ. १. ख. ६)

[गार्हपत्याहवनीययोर्मध्ये श्वातिक्रमणे अनयैव श्वपदेषु भस्म निक्षिपेत्।] v. 17 (contd.)

अग्निहोत्रिणोऽग्निहोत्रशालायां त्रयो वैताना अग्नयो भवन्ति तत्र प्राच्यामेकः प्रतीच्यामेको दक्षिणस्यामितर इति पूर्वमुक्तम्। तत्र प्राचीप्रतीच्योरवस्थितयोराहवनीयगार्हपत्ययोरग्न्योर्मध्ये व्यवधानमन्येन न कर्तव्यम्। यदि प्रमादात्केन चन व्यवधानं तदानीं प्रायश्चित्तं भवति। तत्र यदि शुना व्यवधानं कृतं भवेत् तदानीं शुनः पादचिह्नानि यत्र यत्र दृश्यन्ते तत्र सर्वत्राग्न्योर्मध्यदेशे अनया ऋचा भस्म निक्षेपणीयम्। (आ° श्रौ° अ. ३ ख. ९)

[आतिथ्यायां प्रधानस्य हविष एषैव अनुवाक्या।] v. 17 (contd.)

सोमयागे दीक्षणीयेष्टेरूर्ध्वं वेदितो बहिः सोमं क्रीत्वा शकटेन तं सोमं प्राकृतवेद्यामानीय तस्यातिथिरूपस्य सत्काररूपा येष्टिरनुष्ठीयते तस्या आतिथ्येष्टिरिति नाम। तस्यां चेष्टौ विष्णुर्देवता। तत्र प्रधानयागे इदं विष्णुरित्यनुवाक्या भवति। (आ° श्रौ° अ. ४. ख. ५)

[उपसत्सु वैष्णवस्यैषैवानुवाक्या।] v. 17 (contd.)

सोमयागे दीक्षणीयेष्टेः परवर्तिदिनेषु उपसन्नामका यागा अनुष्ठीयन्ते। ते च त्रयो भवन्ति। प्रतिदिनं पूर्वाह्णापराह्णयोरेकैकस्य द्विरनुष्ठानं भवति। एतेषां संख्या यागभेदेन न्यूनाधिका वा भवति। तेषु च यागेषु त्रयो देवा भवन्ति अग्निः, सोमः, विष्णुरिति। तत्र वैष्णवयागेऽनुवाक्या एषा भवतीति। (आ° श्रौ° अ. ४. ख. ९)

[उपसदि वैष्णवयागस्य प्रातःकाले याज्या सायंकाले त्रीणि पदेति याज्या] v. 18, p. 147.

पूर्वोक्तोपसद्यागेषु प्रतिदिनं द्विरनुष्ठाने पूर्वाह्णवैपरीत्यमपराह्णे कर्तव्यं भवति। तत्र याज्यानुवाक्याव्यत्यासमात्रेण संपत्स्यते। एवं च प्रातःकाले या याज्या सा सायंकाले अनुवाक्या,

एवं या प्रातःकालेऽनुवाक्या सा सायंकाले याज्येति विपर्यासरूपं भवति। तत्र वैष्णवोपसद्यागे प्रातःकाले इदं विष्णुरिति अनुवाक्या तीणि पदेति याज्या, सायंकाले च तीणि पदेति अनुवाक्या इदं विष्णुरिति याज्या भवति। एवं चैषा त्रीणि पदेति प्रातर्याज्या सायमनुवाक्येति सिध्यति। (आ° श्रौ° अ. ४. ख. ९)

No. 6: VIṢṆU

i. 154.

[अभिप्लवषडहे मध्यगतेषु उक्थ्येषु तृतीयसवने स्तोमवृद्धौ अच्छावाकस्य स्तोमातिशंसनार्थमिदमादिकं सूक्तद्वयम्] v. 1, p. 150.

अभिप्लवषडहः, तन्मध्यगतोक्थ्ययागाश्च पूर्वमुक्ताः। उक्थ्यस्य सोमसंस्थाविशेषत्वेन तत्र त्रीणि सवनानि भवेयुः। तत्र तृतीयसवने स्तोमवृद्धौ अच्छावाकेन स्तोमातिशंसनावसरे इदमादिकं सूक्तद्वयमुपयोक्तव्यम्। स्तोमास्त्रिवृत्पञ्चदशसप्तदशैकविंशचतुर्विंशत्रिणवत्रयस्त्रिंशादयः साम्नां गानावसरे तृचगतानाम् ऋचामावृत्त्या संपादितसङ्ख्यया सम्पद्यन्ते। तत्र यस्मिन् स्थले यः स्तोमः सामान्यतः प्राप्तस्तदपेक्षयोत्तरस्य स्तोमस्य निमित्तविशेषेण सामगानावसरे सामगैर्ग्रहणे तत्सारूप्याय मैत्रावरुणादिभिरपि ऋत्विग्भिः स्वीये शस्त्रे अधिका ऋचो वक्तव्या भवन्ति। तदिदमधिकवचनं स्तोमातिशंसनं नाम। तत्र स्तोमविशेषेणाधिकानां गृह्यमाणानामृचामपि सङ्ख्याः आश्वलायनेन श्रौतसूत्रे नियमिताः। यथा—"नित्यादधिकं स्तोमकारणात्पञ्च सप्तदशे नवैकविंशे त्रयोदश चतुर्विंशे पञ्चदश त्रिणवे एकविंशतिं त्रयस्त्रिंशे द्वात्रिंशतं चतुश्चत्वारिंशे षट्त्रिंशतमष्टाचत्वारिंश एकाल्पीयसीर्वैकाहेष्वेकभूयसीर्वा" इति। तत्राच्छावाकेन उक्थ्ये तु तृतीयसवने स्तोमातिशंसने एतत्सूक्तद्वयं वक्तव्यमिति प्रागुक्तम्। (आ° श्रौ° अ. ६. ख. ७)

[तृतीयसवने सोमातिरेके उत्तरसंस्थोपगन्तव्या आतिरात्रात्। ततोऽप्यतिरेके तदर्थमेकं शस्त्रमुपजनयितव्यम्। तत्रैतदेव सूक्तम्] v. 1 (contd.)

सोमयागे प्रतिसवनं यावतां यागानामनुष्ठानं तावतां पर्याप्त एव सोमरसो निष्कासनीयो न न्यूनो नाप्यधिकः। न्यूनत्वे आधिक्ये च प्रायश्चित्तीयता भवतीति प्रागुक्तम्। तत्र प्रातःसवने सोमाधिक्ये वैष्णवं शस्त्रं शंसनीयमिति पूर्वमेवोक्तम्। तृतीयसवने यदि तत्रापेक्षितादधिको भवेत्तदा या सोमसंस्था अनुष्ठातुं प्रारब्धा, यस्यास्तृतीयसवनेऽयं सोमोऽधिकस्तदपेक्षयोत्तरा संस्था तेनातिरिक्तेन सोमेनानुष्ठेया। परसंस्थाऽनुष्ठानेऽपि सोमस्याधिक्यमेव स्यात्तदा तत्परवर्त्तिनी सोमसंस्थाऽनुष्ठेया। एवमतिरात्रपर्यन्तमनुष्ठेयम्। ततोऽपि सोमोऽतिरिक्तश्चेद्भवेत् तदानीं पुनरतिरिक्तशस्त्रं शंसनीयम्। तत्र वैष्णवे शस्त्रे विष्णोर्नु कमिति सूक्तं शंसेदित्यर्थः। (आ° श्रौ° अ. ६. ख. ७)

[अग्निमारुते शस्त्रे आद्या विनियुक्ता] v. 1 (contd.)

सोमयागे होता तृतीयसवने द्वितीयं शस्त्रमाग्निमारुतनामकं शस्यते। तत्र स वैश्वानराय पृथुपाजसे इति सूक्तं पठति, ततो यज्ञा यज्ञा व इति देवो वो द्रविणोदा इति प्रगाथद्वयं स्तोत्रियानुरूप-संज्ञकं पठति। तत्र प्रगाथो नाम यदृग्द्वयं पठनविशेषेण ऋक्त्रयतां नीत्वा पठ्यते स प्रग्रथनात्प्रगाथ इत्युच्यते। पठनविशेषस्त्वेवम्—प्रथमतः प्रथमामृचं प्रपठ्य तदीयमन्तिमं पादं पृथग् गृहीत्वा द्विरावर्त्य उत्तरस्या ऋचः पूर्वार्धेन योजयति। एषा द्वितीया ऋक् संपद्यते। तस्या अप्यृचोऽन्तिमं पादं पृथग्गृहीत्वा द्विरावर्त्य उत्तरस्या ऋच उत्तरार्धेन योजनात्तृतीया ऋक् भवति। तदिदं प्रग्रथनं तद्वशत इदमृग्द्वयं प्रगाथशब्देनोच्यते। इदं च शस्त्रमग्निष्टोमसाम्नोऽनुरूपमिति तत्रत्यं स्तोत्रियमत्र स्तोत्रियशब्देनोच्यते। एवं तत्परवर्ति ऋग्द्वयं प्रगाथरूपमनुरूपं भवति। एवं स्तोत्रियानुरूपयोः पठनोत्तरमत्र शस्त्रे जातवेदस्यं सूक्तं शस्यते तत आपो हिष्ठेति आप्यस्तृचस्तत उतनोऽहिर्बुध्न्य इति ऋग्देवानां पत्नीरिति ऋगद्वयम्, पावीरवी कन्येति ऋग् यामी ऋक् पित्र्याश्च तिस्र ऋचो ययोरोजसा स्काभितेति वैष्णवारुणी ऋक् एवमृक्सङ्घपठनोत्तरं विष्णोर्नु कमित्येषा वैष्णवी पठ्यते। ततस्तन्तुं तन्वन्निति ऋचं प्रपठ्य एवा नो अग्न इत्यनया शस्त्रं समाप्यते ततो अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरिति शस्त्रयाज्यापाठेन सोमो हूयते। इत्येतस्यामाग्निमारुत-शस्त्रप्रक्रियायां प्रकृतवैष्णवसूक्तगतप्रथमाया विनियोग इत्युच्यते। (आ° श्रौ° अ. ५. ख. ८)

[तृतीयसवने सोमस्यातिरिक्तत्वे एकं शस्त्रमुपजनयितव्यं तत्र प्र तदित्यनुरूपस्तृचः] v. 2, p. 152.

तृतीयसवने सोमातिरेके उत्तरोत्तरा अतिरात्रपर्यन्तं संस्था अनुष्ठाय ततोऽप्यतिरेके सोमस्य वैष्णवं शस्त्रं शंसनीयं भवतीति पूर्वमुक्तम्। तस्मिन्शस्त्रे प्र तद्विष्णुरित्यनुरूपस्तृच इति। (आ° श्रौ° अ. ५. ख. ७)

[वाजपेययागे प्र तत्त इति तिस्र ऋचः] v. 2 (contd.)

आधिपत्यकामेन वाजपेययागोऽनुष्ठेयः। तत्र सप्तदशदीक्षा भवन्ति। होतुः शस्त्राणि प्रकृतिवत्। केवलमाज्यं शस्त्रं विश्वजिद्यागवत् भवति। मध्यन्दिनसवने मरुत्वतीयशस्त्रं शस्त्वा बार्हस्पत्येष्टिरनुष्ठीयते। यजमानस्याजिप्रापणं पाक्षिकम्। अभिप्लवषडहस्य तृतीयदिनव-त्तृतीयसवनमत्रानुष्ठीयते। तत्र सामगैर्यदि चित्रवतीषु ऋक्षु स्तुतिः क्रियेत तर्हि प्राकृतगंपेक्षया अतिरिक्तौ त्वं नश्चित्र इत्यादिकौ स्तोत्रियानुरूपावग्निष्टोमसाम्नो भवतः। अत्र षोडशिनोऽ-नुष्ठानात्तदीया प्रक्रिया सर्वानुष्ठेया। तदनुष्ठानोत्तरमतिरिक्तोक्थं शंसनीयम्। तत्र प्र तत्ते अद्येति स्तोत्रियस्तृचः प्र तद्विष्णुरित्यनुरूपो भवति। (आ° श्रौ° अ. ८. ख. २)

[आतिथ्यायां तदस्येत्येषा प्रधानस्य हविषो याज्या] v. 5, p. 155.

आतिथ्येष्टिः पूर्वमुक्ता। तत्र प्रधानदेवता विष्णुस्तदीययागे हविषः प्रदानावसरे तदस्येत्येषा वक्तव्येत्य :। (आ° श्रौ° अ. ४. ख. ५)

No. 7: USAS

iii. 61.

[प्रातरनुवाके उषस्यक्रतावाश्विनशस्त्रे च वैष्टुभे छन्दस्येतस्य सूक्तस्य विनियोगः] v. 1, p. 158.

प्रातरनुवाकादिकं पूर्वं व्याख्यातम्, आश्विनशस्त्रमपि प्रतिपादितम् तत्र वैष्टुभे छन्दसि अस्य सूक्तस्य विनियोगः।

No. 8: USAS

iv. 52.

[प्रातरनुवाके उषस्ये क्रतौ गायत्रे छन्दसि आश्विनशस्त्रे चेदं शस्यम्] v. 1, p. 165.

व्याख्यातम्।

No. 9: AŚVINS

i. 182.

[प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसि अस्य विनियोगः] v. 1, p. 170.

प्रातरनुवाकादिकं व्याख्यातं पूर्वम्।

No. 10: AŚVINS

vii. 74.

[प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः] v. 1, p. 177.

व्याख्यातम्।

No. 11: SŪRYĀ

i. 115.

[आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि तत्रेदं सूक्तम्।] v. 1, p. 181.

आश्विनशस्त्रं पूर्वमुक्तम्। तच्चासूर्योदयं शंसनीयं भवति। तत ऊर्ध्वं सौर्याणि सूक्तानि शंसनीयानि तत्र चित्रं देवानामिति शंसनीयम्। (आ श्रौ अ. ६. ख. ६)

[आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाशहविषां क्रमेण अनुवाक्याः

ततो द्वे वपापुरोडाशयाज्ये] v. 1 (contd.)

सूर्यदेवताकपशुयागानुष्ठाने वपायागे पशुपुरोडाशयागे एवं हृदयादिप्रधानहविर्योगे च एतत्सूक्तप्रारम्भगतास्तिस्र ऋचः क्रमेणैकैकस्यैकैका अनुवाक्यास्ततः परवर्ति मन्त्रद्वयं च वपापुरोडाशयागयोर्याज्यात्वेन विनियुज्यते।

[अतिमूर्तिनाम्न्येकाहे शुनासीर्ये पर्वणि च सूर्यस्य हविषश्चित्रं देवानामित्येषा याज्या]

v. 1 (contd.)

स्वर्गकामेन यजमानेन एकदिनावसेयोऽतिमूर्तिनामकः सोमयागोऽनुष्ठातव्यः, एवं चातुर्मास्यगतपर्वचतुष्टयगते शुनासीर्ये च पर्वणि सौर्यस्य यागस्य चित्रमित्येषा याज्यात्वेन विनियुज्यते। (आ° श्रौ° अ. ९. ख. ८)

No. 12 : AGNI AND MARUTS

i. 19.

[कारीरीष्टौ प्रति त्यमिति धाय्या।] v. 1, p. 189.

प्रथमं जलवर्षणतः क्षेत्रे बीजवापे क्रमेण तस्य अङ्कुरीभावे परिपोषे च फलोन्मुखीभावे फलपरिपोषाय वाऽङ्कुरपरिपोषाय वाऽपेक्षितः पर्जन्यो यदि न पतेत् तदीया लौकिकी पतनमर्यादा वा यदा अतिवाहितेव भवति लौकिकमनुमानं वाऽधुना पर्जन्यो न पतेत् अस्मिन्नवसरे शुष्यच्छस्येन वर्षकामेन कारीरीष्टिः कर्तव्या। तत्र अग्निर्धामच्छद्, मरुतः, सूर्य इति तिस्रो देवता भवन्ति। तत्रेष्टित्वात् इष्टिगतस्येतिकर्तव्यताकलापस्यातिदेशेन दर्शपूर्णमासगतानां सामिधेनीनां तत्पृष्टभावेन तदीयपञ्चदशत्वसङ्ख्याप्राप्तौ अत्र धाय्याद्वयविधानेन चोदकागतां पञ्चदशत्वसङ्ख्यां बाधित्वा सप्तदशसङ्ख्या सम्पन्ना भवति। तत्र सामिधेनीनामिका ऋचश्च स्वयमेकादश वोच्यन्ते। तासामाद्यान्त्ययोस्तिरावृत्त्या पञ्चदशत्वसङ्ख्या संपादिता भवति। तत्र धाय्याद्वयस्य योजने सा ऋक्संख्या सप्तदशतां प्राप्ता भवति। धाय्या नामात्र सामिधेनीषु अधिकतया कथ्यमाना ऋक्। सा चात्र प्रति त्यमित्येषा सूक्तगता प्रथमोक्तकारीरीष्टौ सामिधेनीष्वेका धाय्येत्यर्थः। (आ° श्रौ° अ. २. ख. १३)

No. 18 : ṚBHUS

i. 111.

[अग्निष्टोमे वैश्वदेवशस्त्रे इदं सूक्तमार्भवं निविद्धानम्।] v. 1, p. 196.

सोमयागे प्राथमिकसंस्थायां तृतीयसवने होत्रा शंसनीये प्रथमे वैश्वदेवशस्त्रे ऋभुदेवतासम्बन्धिनिविदां शंसने उपयुक्तमिदं सूक्तम्। निविदध्यायपठिता मन्त्रा निविद इति पूर्वमुक्तम्। ताश्च निविदो यज्ञे कस्मिंश्चन सूक्ते मध्ये शस्यन्ते। यस्मिन् सूक्ते इमे निविन्मन्त्राः पठ्यन्ते तत्सूक्तं निविद्धानमित्युच्यते। (आ° श्रौ° अ. ५. ख. १८)

No. 14 : VARUṆA

v. 85.

[विनियोगो लैङ्गिकः।] v. 1, 202.

सूक्तविनियोगो लैङ्गिक इत्यलत्यटिप्पण्या व्याख्यातम्।

No. 15 : PARJANYA

v. 83.

[अच्छा वद तवसम् अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेयाः ।] v. 1, p. 209.

पूर्वं वर्षकामेष्टिका तस्यामवसितायामनेन कृत्स्नेन सूक्तेन चतसृभिरृग्भिर्वा प्रत्यृचं वा दिश उपस्थेयाः । तदुक्तमाश्वलायनेन—"संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिरिति चतसृभिः प्रत्यृचं सूक्तेन वेति ।

No. 16 : PŪṢAN

vi. 54.

[अर्थार्थिभिः प्रवसद्भिरेतज्जप्यम् ।] v. 1, p. 218.

अर्थार्जनाय देशान्तरं ग्रामान्तरं वा गच्छता संपूषन्निति सूक्तं जपनीयम् । तदुक्तं शौनकेन अर्थचर्यां चरिष्यन्संपूषन्विदुष इति ।

No. 17 : MITRA

iii. 59.

[अग्निहोत्रार्थे पयसि वृष्टिबिन्दुनिपाते मित्रो जनानित्यनया समिधमादध्यात् ।] v. 1, p. 224.

वैदिक्या प्रक्रियया अग्नीनामरणिमन्थनतः संपादनमग्न्याधानम् । तत् कृत्वा प्रत्यहं सायंप्रातर्हूयमानहोमौ—अग्निहोत्रम् । तत्र पयसा होमः । तच्च पयस्तदर्थं नियताया एव गोरुपयुज्यते । सा च अग्निहोत्रार्थं नियता गौरग्निहोत्रीति प्रतिपाद्यते । तदीयमग्निहोत्रार्थं यत्पयस्तस्मिन्वृष्टिबिन्दुनिपाते मित्रो जनानित्येतयाऽग्नौ समिदाधानं कर्तव्यमित्यर्थः ।

[देवसुवां हविष्पु मित्रस्य सत्यस्य प्र स मित्रेति अनुवाक्या ।] v. 2, p. 225.

सोमयागे उपसदामनुष्ठानोत्तरमुत्तरवेद्यामग्नीषोमौ प्रणीय अग्नीषोमीयपशुयागोऽनुष्ठीयते तत्र मैत्रावरुणाय दण्डप्रदानोत्तरं देवसूसञ्ज्ञकदेवतानामष्टौ यागा अनुष्ठीयन्ते विकल्पेन । ताश्च देवताः अग्निर्गृहपतिः, सोमो वनस्पतिः, सविता सत्यप्रसवः, बृहस्पतिर्वाचस्पतिः, इन्द्रो ज्येष्ठः, मित्रः सत्यः, वरुणो धर्मपतिः, रुद्रः पशुमान् इति । तत्र सत्यनामकमित्रस्य यागानुष्ठाने प्र स मित्रेत्येषा अनुवाक्या । (आ° श्रौ° अ. ४. ख. ११)

[एषैव प्रातर्होमस्य कालात्ययनिमित्ते मैत्रेष्टौ याज्या ।] v. 2 (contd.)

अग्निहोत्रिणा सायंप्रातरनुष्ठीयमानहोमौ अग्निहोत्रशब्देनाभिधीयेते । तयोरनुष्ठाने प्रातः सायं च कालनियमः रात्रौ प्रदोषान्तो होमकालः, प्रातश्च संगवान्तः । पञ्चधाविभक्तदिवसीयद्वितीयो भागः संगवः । एवं पञ्चधाविभक्तरात्रिद्वितीयभागः प्रदोषः । तदतिक्रमे प्रातः, प्रातर्वस्तनमः स्वाहेति अग्निहोत्रं हविरुपसाद्य भूर्भुवःस्वरिति जपित्वा वरं गां दत्त्वा होमः कर्तव्यः । तत्रोऽग्निहोत्रं पुनः प्रणीयेष्टिरनुष्ठेया तत्र मित्रो देवता । तत्रेष्टौ प्र स मित्रेत्येषा याज्या प्रधाने यागे । (आ° श्रौ° अ. ३. ख. १२)

अभिप्लवषडहे दशरात्रे च सप्तदशैकविंशादिस्तोमे सति होत्रकादिशस्त्रेष्वेवावापस्थाने पञ्चपञ्चादिसङ्ख्याका ऋच आवपनीयाः। तत्र मैत्रावरुणशस्त्रे मित्रस्य चर्षणीधृत इत्याद्याश्चतस्र आवापार्थाः। v. 6, p. 229.

यत्र यागे छन्दोगैः सप्तदशैकविंशचतुर्विंशत्रिणवत्रयस्त्रिंशदादिस्तोमाः सामगानावसरे उपादीयन्ते तत्राभिप्लवदशरात्रादिषु होत्रकसम्बन्धकैर्मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकैर्ऋत्विग्भिरधिका ऋच आवपनीयास्तत्र स्तोमानुरोधेन सप्तदशे पञ्च एकविंशे नवेत्यादिक्रमेण। तत्र मैत्रावरुणेनोप्यमानासु ऋक्षु मित्रस्य चर्षणीधृत इत्याद्याश्चतस्रो भवन्ति। तदुक्तं भाष्यकृता।

No. 18 : MITRA AND VARUṆA

v. 62.

[तुह्यादिपरिभाषया एतदादीन्येकादश सूक्तानि मित्रावरुणदेवत्यानि। विनियोगो लैङ्गिकः।]

v. 1, p. 233.

अनुक्रमणिकाकारेण स्वग्रन्थप्रारम्भे स्वग्रन्थोपयोगिन्यः काश्चन परिभाषा उक्ताः। अनियमे नियमकारिण्यः परिभाषाः। तादृशपरिभाषाणां मध्ये एकैवमुच्यते तेन—"तुहिह्वैतच्छब्दयुक्तान्यृषिदैवतच्छन्दांसि द्विचतुःपञ्चषट्सूक्तभाञ्जीति"। अयमर्थः—यत्र क्वापि अनुक्रमणिकाकथनप्रसङ्गे ऋष्यादिबोधकशब्दोत्तरं तुहिह्वैतदितिशब्दपञ्चकमध्ये कोऽपि शब्दश्चेत्प्रयुक्तो दृश्येतानुक्रमणिकाग्रन्थे तत्तोक्तशब्दवशत ऋष्यादिकं सूक्तद्वयादिसम्बन्धि भवतीति विज्ञेयमिति। तत्र यदि तुशब्दयोगस्तदानीं तदृष्यादिकं सूक्तद्वयसम्बन्धि, हिशब्दयोगे सूक्तत्रयसम्बन्धि, हकारयोगे सूक्तचतुष्टयसम्बन्धि, वैकारे सूक्तपञ्चकसम्बन्धि, तच्छब्दयोगे च सूक्तषट्कसम्बन्धि भवतीति। एवं चात्र सूक्ते अनुक्रमणिकाकारेण "ऋते नव श्रुतविन्मैत्रावरुणं तद्" इति देवताबोधकशब्दोत्तरं तच्छब्दप्रदानादिदं सूक्तमारभ्य सूक्तषट्कपर्यन्तं मित्रावरुणयोर्दैवत्वमिति भवति। भाष्यकृता चैकादशसूक्तपर्यन्तं मित्रावरुणयोर्दैवतात्वमुच्यते। तस्यायं भावः—उक्तरीत्या तच्छब्दप्रयोगेण सूक्तषट्कसम्बन्धोत्तरं परवर्तिसूक्तपञ्चके "ऋषिश्चान्यस्मादि"ति परिभाषातुल्यन्यायेन पूर्वस्मादेवताऽनुवर्तनीया देवतानुक्ताविति मित्रावरुणयोरेव तत्र देवतात्वं भवतीति। तदेतत्सारूप्येणोक्तमेतदादीनीत्यादिना।

No. 19 : RUDRA

ii. 33.

[आ ते पितः]

[शूलगवादिरुद्रयज्ञेष्वनेन सूक्तेन प्रतीची दिगुपस्थेया।] v. 1, p. 241.

रुद्रोद्देश्यकेषु यागेषु सर्वेषु दिश उपस्थेया भवन्ति। तत्र प्रतिदिशमुपस्थाने विभिन्नविभिन्ना मन्त्रा भवन्ति। तत्र प्रतीच्या दिश उपस्थाने आ ते पितरिति सूक्तं पठनीयमित्यर्थः (आ° गृ° अ. ३. ख. ९)

[रुद्रदेवत्ये पशावा ते पितरिति हविषोऽनुवाक्या ।] v. 1 (contd.)

तदुक्तमाश्वलायनेन पाशुकानां प्रदानानां प्रैषान् उक्त्वा याज्यानुवाक्यातो देवतादिकमुन्नेयमित्यर्थकेन "प्रदानानामुक्ताः प्रैषास्तेषां याज्यानुवाक्या" इति। ततो याज्यानुवाक्याकथनप्रसङ्गे "मृळा नो रुद्रो तनो मयस्कृधीति द्वे आ ते पितर्मरुतां सुम्नमेतु प्र वश्रवे वृषभाय श्वितीच इति तिस्र" इति वचनेन मध्यवर्ति आ ते पितरित्यस्यानुवाक्यात्वं प्रतिपन्नं भवति। यतस्तेन पूर्वानुवाक्या परस्ताद्याज्येति परिभाषणेन मृळान इति मन्त्रद्वयकथनोत्तरमा ते पितरित्यस्य तृतीयत्वेन कथनेन परवर्तियाज्यानुसारेणैषाऽनुवाक्येति सिध्यति। (आ° श्रौ° अ. ३. ख. ७)

रोगाक्रान्ते मृत्युजयार्थमाज्याहुतिहोमार्थमिदं सूक्तमिति शौनकेन ऋग्विधाने उक्तं तदेवात्र भाष्यकृतोल्लिख्यते [शौनक इत्यादिना]

[रुद्रदेवत्ये पशौ वपापुरोडाशहविषां प्र वश्रव इति तिस्रो याज्याः।] v. 8, p. 247.

उक्ताश्वलायने सूत्रे प्र वश्रव इति तिस्र इति वर्णनेन वपापुरोडाशहविषामेता याज्या इति प्रतीयते, यतः पशुयागे वपापुरोडाशहवीरूपास्त्रिविधा यागा भवन्ति, तत्र त्रिषु यागेषु तिस्रोऽनुवाक्याः पूर्वमुक्त्वा तिस्रो याज्या उच्यन्त इति सङ्गतं सूत्रम्। (आ° श्रौ° अ. ७. ख. ७)

[प्रयाणे मृगस्यामनोज्ञवचः श्रुत्वा स्तुहि श्रुतमित्येतां जपेत्] (not in the text.)

समावृत्तेन गुरुकुलतो मार्गे गमनावसरे मृगस्यामनोज्ञं वचः श्रुत्वा स्तुहि श्रुतमिति ऋग्जपः कर्तव्य इति आश्वलायनगृह्यसूत्रे उक्तम्। (आ° गृ° अ. ३ ख. ९)

No. 20: SOMA

ix. 1.

[स्वादिष्ठया] v. 1, p. 249.

[प्रावस्तोर्बृहदुक्थस्य प्रागुक्तमाया इदमादिकं सर्वं पावमानं विकल्पेनावपनीयम्]

सोमयागे षोडशर्त्विजो भवन्ति तत्र मुख्याश्चत्वारस्तेषाममुख्याः प्रत्येकं त्रयो भवन्ति। तत्र मुख्यो होताऽध्वर्युरुद्गाता ब्रह्मेति चत्वारः। तत्र होतुर्मैत्रावरुणोऽच्छावाको प्रावस्तुदिति त्रयः अमुख्याः, अध्वर्योः प्रतिप्रस्थाता नेष्टोन्नेतेति त्रयः, उद्गातुः प्रस्तोता प्रतिहर्ता सुब्रह्मण्येति त्रयः। ब्रह्मणश्च ब्राह्मणाच्छंस्याग्नीध्रः पोतेति त्रयः। होतुरमुख्येन प्रावस्तुन्नामकेनर्त्विजा सोमाभिषवावसरे उत्तरवेद्यां हविर्धानस्यैशान्यां शकटाक्षस्योत्तरत उपविश्योल्मीपेणाक्षौ पिनद्ध सोमाभिषवप्राग्गोऽभिष्टवः कर्तव्यः। तत्र कानिचन सूक्तानि शस्त्वा प्रैते वदन्तु प्र वयं वदामेति सूक्तमर्बुदनामकं शंसनीयम्। तस्य सूक्तस्यान्तिमामृचमवस्थाप्य मध्ये आ व ऋञ्जसे इति प्र वो ग्रावाण इति च सूक्ते शंसनीये। तयोरादौ वा मध्ये वा तदनन्तरं वा पावमान्य ऋचः शंसनीया इति प्रकृतसूक्तस्यापि पावमानत्वेन तदपि तत्र शंसनीयमित्यर्थः। तत्रार्बुदसूक्तस्य मध्ये एतच्छंसनेनावापशब्देन व्यवहारः। (आ° श्रौ° अ. ५. ख. १८)

[उपाकर्मणि मण्डलादिग्रहण आद्या]

वर्षासु ओषधीनां प्रादुर्भावे श्रावणमासि श्रवणादि-नक्षत्रेऽधीतस्य स्वाध्यायस्योपाकरणाख्यं कर्म कर्तव्यं भवति। तदिदमुपाकर्म। तत्र होमार्थं लौकिकमग्निं प्रतिष्ठाप्य तत्राज्य-भागनामकमाहुतिद्वयं हुत्वा सावित्र्यादिदेवता उद्दिश्य घृतेनाहुतिहोमोत्तरं दधिविमिश्र-सक्तुभिः संहिताया मण्डलाद्यान्तमन्त्रैर्होमाः कर्तव्याः। तत्रैषा स्वादिष्ठयेति ऋक् नवममण्डल-स्यादिभूतेति अनयापि होमः कर्तव्य इति तत्रैषा विनियुज्यते। (आ° श्रौ° ८. अ. ३. ख. ५)

No. 21 : ĀPAS

x. 9.

[गतः सूक्तविनियोगः। आग्निमारुते आपो हीत्याद्यास्तिस्रः] v. 1, p. 255.

लिङ्गादिना सूक्तस्य विनियोगो ज्ञातव्य इत्यभिप्रायेण गतः सूक्तविनियोग इत्युक्तम्।

आग्निमारुतं शस्त्रं होता सोमयागे तृतीयसवने शंसनीयमिति पूर्वमुक्तमेव। तत्रादित ऋक्त्रयं पठनीयमित्यर्थः। (आ° श्रौ° अ. ५. ख. ८०)

[कारीर्यामुत्तमस्याज्यभागस्य अप्सु म इत्येषा अनुवाक्या] v. 6, p. 258.

वर्षकामस्य कारीरीष्टिः पूर्वमुक्ता। तस्यां प्रथमत आधारहोमोत्तरमाज्यभागनामकौ होमौ प्रकृतिवद्विकृतिः कर्तव्येति न्यायेन प्राप्तौ। तत्र होमयोर्मन्त्रावपि प्रकृतिगतावत्र प्राप्तौ तदपवादत्वेन द्वितीयस्याज्यभागस्यानुवाक्यात्वेन अप्सु म इत्येषा ऋक् विनियुज्यते। (आ° श्रौ° अ. ८. ख. १६)

[पशौ मार्जने इदमापः प्र वहतित्येषा विनियुक्ता] v. 8, p. 259.

पशुयागे वपाहोमोत्तरं ब्रह्मसहितैऋंत्विग्भिश्चात्वाले मार्जनं कर्तव्यं तत्र इदमाप एषापि वक्तव्या भवति। चात्वालो गर्तविशेषः। मार्जनमद्भिः प्रोक्षणम्। (आ° श्रौ° अ. ३. ख. ५)

[एषैवावभृथेष्टौ स्नाने विनियुक्ता] v. 8 (contd.)

सोमादियागे पत्नीसंयाजपर्यन्तमनुष्ठाय तत उदकसमीपं गत्वा वारुणीष्टिः कर्तव्या। सेयमव-भृथेष्टिः। तस्यामवसितायां तत्र जले स्नानं कर्तव्यं भवति। तत्र स्नानावसरे इदमाप इत्येषा वक्तव्या।

[पशौ आहवनीयोपस्थाने आपो अद्यान्वचरिषमित्येषा] v. 9, p. 260.

पशुयागसमाप्तेरूर्ध्वमाहवनीयाद्यग्नीनामुपस्थानं कर्तव्यम्। तत्राहवनीयस्योपस्थाने आपो अद्येत्येषा वक्तव्येत्यर्थः। (आ° श्रौ° अ. ३. ख. ६)

No. 22: VĀTA

x. 168

[गतो विनियोगः] v. 1, p. 262.

व्याख्यातम्।

No. 24: YAMA

x. 14

[महापितृयज्ञे यमयागस्य याज्या] v. 1, p. 270.

चातुर्मास्ययागे साकमेधनामके पर्वणि अनीकवान् अग्निः। सान्तपना मरुतः, गृहमेधिनो मरुतः, इन्द्रः, अग्निः, सोमः, सविता, सरस्वती, पूषा, क्रीडिनो मरुतः, अग्निः, सोमः, सविता, सरस्वती, पूषा, इन्द्राग्नी, इन्द्रो महेन्द्रो वा, विश्वकर्मा चेति देवानुद्दिश्य यागा अनुष्ठीयन्ते। तत्र प्रथमपूषयागान्तं पूर्वदिने अनुष्ठानं भवति, ततः परं परदिनेऽनुष्ठीयते। उक्तयागाननुष्ठाय ततः पितृदेवताका इष्टिरनुष्ठीयते। सा च महापितृयज्ञशब्देनोच्यते। तत्र सोमवन्तः पितरः पितृमान् वा सोमः, बर्हिषदः पितरः, अग्निष्वात्ताः पितरः, यमो वैवस्वतो वा यम इति देवताः। प्रतिदेवतमत्रानुवाक्याद्वयम् एका च याज्येति मन्त्रत्रयमुपयुज्यते। तत्र देवतात्वेन यमं गृहीत्वा यागकल्पे परेयिवांसमित्येषा यमयागस्य याज्येत्यर्थः। (आ° श्रौ° अ. ८. ख. १९)

[आग्निमारुते मातली कव्यैरिति धाय्या] v. 3, p. 272.

सोमयागे तृतीयसवने होतुर्द्वितीयं शस्त्रमाग्निमारुतं नाम। तस्मिन्शस्त्रे धाय्यात्वेनैषा विनियुक्ता। धाय्या नाम शस्त्रमध्ये पठनीया ऋक्। (आ° श्रौ° अ. ५. ख. १९)

[महापितृयज्ञे यमस्येमं यमस्येत्यादिके द्वे अनुवाक्ये] v. 4, p. 273.

चातुर्मास्ययागीय ऋक्के महापितृयज्ञे यमदेवतापक्षे इमं यमस्येत्यादिके द्वे ऋचावनुवाक्यात्वेन विनियुज्येते। अनुवाक्या नाम हविषो ग्रहणावसरे पठ्यमाना ऋक्। सा च सर्वत्रैकैव भवति परन्त्वत्र यागेऽनुवाक्याद्वयं भवति इति पूर्वमुक्तमेव। (आ° श्रौ° अ. ८. ख. १९)

[सत्रमध्ये दीक्षितस्य मरणे प्रेहीत्याद्याः पञ्चर्चस्तृतीयावर्जिता होता शंसनीयाः] v. 7, p. 275.

समानकल्पैरग्निहोत्रिभिः सप्तदशावरैश्चतुर्विंशतिपरमैरनुष्ठीयमानाः सोमयागविशेषाः सत्राणि नाम, येषां यागानां विधानावसरे ब्राह्मणवाक्ये इण्धातोर्वा आस्धातोर्वा बहुवचनान्तस्य प्रयोगः क्रियते। ते चाग्निहोत्रिणः सम्भूय यागं कुर्वन्तः कर्मसौकर्यायैकैकस्यैकैकं कार्यं निर्णीय ऋत्विग्रूपा यजमानरूपा वा भूत्वा यागमनुतिष्ठन्ति। तत्र यो यजमानस्तस्य दीक्षित इत्युक्तिः। तस्य दीक्षितस्य चेत् तत्कर्ममध्ये मरणं तदा तं श्मशानं नीत्वा दाहोत्तरं

गृहमागत्य तदहःकर्तव्यं समापयेयुः। तत्र होता तद्दिनवक्तव्ये स्वीयमन्त्रसङ्के शस्त्रादिषु याम्या ऋचो वक्तव्यास्तत्र प्रेहि प्रेहीत्या द्यास्तृतीयावर्जिता पञ्च ऋचो वक्तव्या भवन्ति। (आ° श्रौ° अ. ६. ख. १०)

[पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षति अपेत वीतेति] v. 9, p. 276.

आहिताग्नेर्मरणे तं यज्ञपात्रैः सह श्मशानं नीत्वा यत्र तस्य दाहः कर्तव्यस्तस्य श्मशानायतनस्य प्रथममद्भिः प्रोक्षणं कर्तव्यम्। तत्र प्रोक्षणेऽयं मन्त्रः प्रयुज्यते। (आ° गृ° अ. ४. ख. २)

[अनुस्तरण्या वृक्षौ पार्श्वयोराम्रफलाकृती तावुद्धृत्य प्रेतस्य हस्तयोर्निदधाति अति द्रव सारमेयेति] v. 10, p. 277.

आहिताग्नेर्मरणे श्मशाने तस्य दाहावसरे यज्ञपात्राणि छित्त्वा भित्त्वाऽऽहिताग्नेस्तत्तदवयवेषु तानि विन्यस्यन्ते। तदा अनुस्तरणीपशोर्वृक्षभागौ छित्त्वा तस्य हस्तयोर्न्यसितव्यौ भवतस्तत्र एतन्मन्त्रस्य पाठः कर्तव्य इत्याश्वलायनगृह्यसूत्रे उच्यते। (आ° गृ° अ. ४. ख. ३)

No. 25: PITṚS.

x. 15

[अष्टकायामुदीरतामवर उत्परास इत्याद्या अष्टावृचो होमार्थाः] v. 1, p. 282.

हेमन्तशिशिरर्त्वोरपरपक्षेषु अर्थात्तदीयमासगतकृष्णपक्षेषु अष्टमीष्वष्टकाख्यं कर्म कर्तव्यम्। तत्र पूर्वेद्युरोदनेन कृसरेण (तिलमिश्र ओदनः कृसरशब्दबोध्यः) पायसेन वा पितॄनुद्दिश्याष्टाबाहुतयो होतव्यास्तत्र उदीरतामित्याद्या अष्टावृचो ग्रहीतव्या होमार्थम्। तदेतदाश्वलायनगृह्ये प्रतिपादितम्। (आ° गृ° अ. ८. ख. ४)

[महापितृयज्ञे पितरः सोमवन्त इत्यस्यानुवाक्या उदीरतामित्येषा] v. 2, p. 283.

पूर्वोक्ते महापितृयज्ञे पितरः सोमवन्तो देवता इति वैकल्पिकदेवताग्रहणे तद्देवताके यागे उदीरतामित्येषा अनुवाक्येत्यर्थः। (आ° श्रौ° अ. २. ख. १९)।

[अग्निमारुतेऽप्येषा धाय्या]—v. 2 (contd).

सोमयाग आग्निमारुतसञ्ज्ञके होतुस्तृतीयसवनीये द्वितीयशस्त्र एषा धाय्या।

(आ° श्रौ° अ. ५. ख. २०)

[महापितृयज्ञे पितरो बर्हिषद इत्यस्येदं पितृभ्य इति द्वितीयानुवाक्या] v. 2 (contd.)

उक्तमहापितृयज्ञे बर्हिषन्नामकपितृयागे इदं पितृभ्य इत्येषा द्वितीयानुवाक्या। अत्र प्रतियागमनुवाक्याद्वयं भवतीति पूर्वमेवोक्तम्। (आ° श्रौ° अ. ८. ख. १७)

[महापितृयज्ञे पितरः सोमवन्त इत्यस्य याज्या—उपहूता इति] v. 5, p. 285.

व्याख्यातम् ।

[महापितृयज्ञे ऽग्नेः कव्यवाहनस्य ये तातृपुरिति प्रथमानुवाक्या]*

व्याख्यातप्रायम् ।

[महापितृयज्ञे पितरोऽग्निष्वात्ता इत्यस्याग्निष्वात्ताः पितर इत्येषा प्रथमानुवाक्या]

उक्तमहापितृयज्ञे ऽग्निष्वात्तनामकपितृयागे अग्निष्वात्ताः पितर इत्येषा प्रथमानुवाक्या। अत्र यागेषु अनुवाक्याद्वयं भवतीति द्वितीयानुवाक्यानिरासाय प्रथमेति अनुवाक्याविशेषणं भाष्ये। (आ° श्रौ° अ. ८. ख. १९)

[महापितृयज्ञे वषट्कारक्रियायां त्वमग्न इत्येषा स्विष्टकृतो याज्या]

चातुर्मास्ययागे साकमेधे पर्वणि अनुष्ठीयमाना पिण्डपितृयज्ञशब्देनोच्यते इति प्रागुक्तम्। सा चेष्टिरिति प्रकृतिवद्विकृतिः कर्तव्येति नयेन इष्टिप्रकृतिदर्शपूर्णमासेष्टिवदनुष्ठीयते। तत्रोक्तन्यायेन प्रारम्भत आन्तं दर्शपूर्णमासवत्सर्वस्यानुष्ठाने प्राप्ते केषांचन निषेधः क्रियते यथा दर्शपूर्णमासेष्टिरन्वाधानादिब्राह्मणतर्पणान्ता भवतीति अत्रापि तादृशत्वे प्राप्ते उक्तं "शंयवन्ता पिण्डपा" इति। तेन शंयुवाकसंज्ञकैर्मानुष्ठानपर्यन्तमेवैषा अनुष्ठेया न तत ऊर्ध्वं ब्राह्मणतर्पण-पर्यन्तम्। एवं वषट्कारानुमन्त्रणाभिहिंकारा वर्जनीया अत्र। वषट्कारो नाम याज्यान्ते प्रोच्यमानः प्लुतादिर्वौषडिति शब्दप्रयोगः। तस्मिन्नुक्ते यागोज इत्यादिमन्त्रजपोऽनुमन्त्रणम्। होत्रा स्वीयसामिधेन्यादिपाठप्रारम्भे प्रोच्यमानो हिमिति शब्दप्रयोगोऽभिहिङ्कारः। एतान् वर्जयेत्। एवमादिबहुलं वैशिष्ट्यमत्र भवति। तत्र सप्तदशाक्षरच्छन्दस्य प्रयोगेऽपि प्रकृत्यपेक्षया भिन्नान्येव वाक्यानि प्रयुज्यन्ते। तत्र प्रकृत्या ओश्रावयेत्याश्रावणमस्तु श्रौषडिति प्रत्याश्रावणं यजेति संप्रैषो ये यजामह इत्यागूर्वौषडिति वषट्कार इति सप्तदशाक्षर-च्छन्दस्यः प्रयुज्यतेऽत्र तु ओं स्वधेत्याश्रावणमस्तु स्वधेति प्रत्याश्रावणमनु स्वधेति संप्रैषो ये स्वधेति वा ये स्वधामह इति वा आगूः स्वधानम इति वषट्कार इत्येवं छन्दस्यः प्रयुज्यते। एवमादे-र्विशेषस्य स्विष्टकृदनुष्ठानोत्तरं परित्यागोऽर्थात्प्रकृतिवदनुष्ठानं भवति। तेन स्विष्टकृद्यागे एकैवानुवाक्या एका च याज्या भवति। स्विष्टकृतश्चाग्निः कव्यवाहनो देवतेति तत्र तदीये याज्यानुवाक्ये भवतः। तत्र याज्यात्वेनात्र त्वमग्न इति प्रयुज्यते। वषट्कारकरणं वैकल्पिकं तत्पक्षे प्रकृतिवदनुष्ठानस्य वचनादुक्तस्य स्विष्टकृतो याज्यैषेत्याह भाष्यकारः। (आ° श्रौ° अ. ८. ख. १९)।

No. 26 : PURUṢA-SŪKTA

x. 90

[गतो विनियोगः] v. 1, p. 288

* Of hymn No. 25, this portion and the next are not included in the text in the Selections.

No. 27 : PRAJĀPATI

x. 121

[प्राजापत्यपशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रो याज्याः] v. 1, p. 301.

प्रजापतिदेवताकपशुयागानुष्ठाने हिरण्यगर्भसूक्तस्य प्रथमतः षडृच उच्यन्ते। तदुक्तमाश्वलायनेन श्रौतसूत्रे "हिरण्यगर्भ इति षट् प्राजापत्या" इति। यद्यप्यत्र सूक्तप्रतीकमन्त्रमादाय षडिति ऋक्संख्यां निर्दिश्य प्राजापत्या इत्यनेन देवतासम्बन्धमात्रमुक्तं न तु कर्मविशेषो न वा तद्गतो विनियोगस्थलविशेषो वोक्तस्तथापि पूर्वं तेन "वपा पुरोडाशो हविरिति पशोः प्रदानानी"ति पशुयागमात्रे प्रदानशब्देन ग्राह्यान् वपादीन् यागानुक्त्वा ततः "प्रदानानामुक्ताः प्रैषास्तेषां याज्यानुवाक्याः सर्वेषामग्रेऽग्रेऽनुवाक्यास्ततो याज्या दैवतेन पशुनानात्वम्" इति प्रदानानां प्रैषमन्त्रकथनोत्तरं याज्यानुवाक्याकथनप्रसङ्गे देवताभेदेन भिन्नानां पशूनां प्रथमतोऽनुवाक्यास्ततो याज्या विज्ञेया इत्यर्थकमुपर्युक्तं ग्रन्थं परिभाष्य ततो मन्त्रप्रदर्शने "हिरण्यगर्भ इति षट् प्राजापत्या" इति हिरण्यगर्भसूक्तगतानां षण्णामृचां प्राजापत्या इति विशेषणादत्र प्रजापतिदेवताकः पशुयागो गृह्यते तदीयानि प्रदानानि चोक्तरीत्या वपायाग-पुरोडाशयाग-प्रधानहविर्याग-रूपाणि त्रीणि गृहीत्वा तेषु याज्यानुवाक्यात्वेनोक्तमन्त्रषट्कं विनियुक्तम्। तेष्वपि "अग्रेऽग्रेऽनुवाक्यास्ततो याज्या" इति प्रोक्तपरिभाषणेनोक्तमन्त्रषट्के प्रथमं मन्त्रत्रयं प्राजापत्यपशौ वपादियागत्रये अनुवाक्यारूपं ततः परवर्तिमन्त्रत्रयं याज्यारूपमिति विज्ञायते। तदेतदभिप्रेत्य भाष्यकृताऽत्र प्राजापत्येत्यादिविनियोगस्वरूपमुक्तम्। (आ° श्रौ° अ. ३. ख. ७)

[वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भ इत्येषा याज्या] v. 1 (contd.)

अग्निहोत्रिणा मन्थनेनाग्निनिष्पादनाख्यमाधानं कृत्वा प्रत्यहं सायंप्रातरग्निहोत्रनामकौ होमावनुष्ठीयेते। ततः प्रतिपौर्णमासं प्रत्यमावास्यं च दर्शपूर्णमासनामकयागावनुष्ठायाग्रयण्यादीष्टिभिः पशुयागैश्चेष्ट्वा ततश्चतुर्षु मासेषु प्रतिपर्व चातुर्मास्यनामकयागा अनुष्ठीयन्ते। तत्र फाल्गुन्यां चैत्र्यां वा पौर्णमास्यां वैश्वदेवनामकं पर्वानुष्ठीयते। चातुर्मास्ययागस्य वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयाख्यानि चत्वारि पर्वाणि भवन्ति। प्रतिपर्वं चानेके यागा अनुष्ठीयन्ते। तत्र प्राथमिकपर्वानुष्ठानं फाल्गुन्यां चैत्र्यां वा भवतीत्युक्तम्। प्राथमिकपर्वानुष्ठानपौर्णमासीतः पञ्चम्यां पौर्णमास्यां वरुणप्रघासनामकं पर्वानुष्ठीयते। एवं ततः पञ्चम्यां पौर्णमास्यां साकमेधं पर्व ततः पञ्चम्यां पौर्णमास्यां शुनासीरीयमिति पर्वाण्यनुष्ठीयन्ते। तत्र वैश्वदेवपर्वणि सोम-सवितृ-सरस्वती-पूष-त्वतृसंज्ञकमरुद्-विश्वदेव-द्यावापृथिवीदेवताकाः क्रमेणाष्टौ यागा अनुष्ठीयन्ते। वरुणप्रघासे वैश्वदेवपर्वोक्तपष्ठादिदेवतानां स्थाने इन्द्राग्नी, मरुतः, वरुणः, क इति देवा भवन्ति तद्देवताकाश्च यागा अनुष्ठीयन्ते। तत्र क इति प्रजापतेर्नाम। तद्देवताकेऽत्र पर्वयागे हिरण्यगर्भः इत्येषा ऋक् याज्यात्वेन विनियुक्ता। तदुक्तं भाष्यकृता वरुणप्रघासेष्वित्यादिना। (आ० श्रौ० अ. ८. ख. १७)

APPENDIX III

VEDIC VOCABULARY

अंहः, sin, v. 2, No. 17; v. 2, No. 19.
अंहसः, from sin, v. 6, No. 11.*
